CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ।

अथ सटीकः ।

मुहूर्तदीपकः ।

प्रणम्यैकरदं देवं शारदां गुरुमेव च ॥
मुहूर्तदीपकं कुर्वे बालाज्ञानतमोपहम् ॥ १ ॥

श्रीगणेशाय नमः ॥ ग्रंथकर्ता कथयति अहं मुहूर्तदीपकं कुर्वे; मुहूर्तान् जातकर्मादिसंस्कारसमयान् दीपयतीति, किं कृत्वा एकरदं देवं गणेशं च परं शारदां सरस्वतीं गुरुं च प्रणम्य, किंलक्षणं मुहूर्तदीपकं बालानां अज्ञानमेव तमः तदपहंतीति बालाज्ञान-तमोपहः तम् ॥ १ ॥

नंदाभद्राजयाख्याः प्रतिपदभिमुखा रिक्तिकाः स्युश्च पूर्णाः संज्ञातुल्यार्थकृत्या भृगुविदवनिजार्कीज्यवारेषु सिद्धाः ॥ स्त्रीसेवाक्षौरतैलामिषमशुभममाभूतषष्ठ्यष्टमीषु स्नानं नाशाक्षिविश्वैः परिमिततिथिषु त्रिंशदंकाद्रितुल्ये ॥ २ ॥

प्रतिपदभिमुख्यास्तिथयो नंदाभद्राजयाख्याश्च परं रिक्तिकाः पूर्णाः स्युः । प्रतिपत् अभिमुख्या यासां ताः, अत्र बहुवचनं तिस्रो नंदाख्याः तिस्रो भद्राख्याः, तिस्रो जयाख्याः, तिस्रो रिक्तिकास्तिस्रः पूर्णाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एताः संज्ञातुल्यार्थकृत्याः संज्ञातुल्यं अर्थकृत्यं कार्यनिष्पत्तियासु ताः, एता एव नंदाद्याः भृगुविदवानिजार्कीज्यवारेषु चेद्भवंति तदा सिद्धाः स्युः । 'नंदा शुक्रे बुधे भद्रा जया भौमे शनेर्दिने । रिक्ता पूर्णा गुरौ वारे सिद्धाः स्युस्तिथयः क्रमात् ॥' अमाभूतषष्ठचष्टमीषु क्रमेण स्त्रीसेवा क्षौरतैलामिषं अशुभं वर्ज्यमेव यदुक्तम् 'षष्ठीषु तैलं पलमष्टमीषु क्षौरक्रियां चैव चतुर्दशीषु । स्त्रीसेवनं नष्टकलासु पुंसामायुःक्षयार्थं मुनयो वदंति ॥' आशाक्षिविश्वैः आशा दश १०, अक्षिणी द्वे २ विश्वे त्रयोदश, एतैः परिमिततिथिषु दशमीद्वितीयात्रयोदशीषु त्रिंशत् ३० अंकाः ९ अद्रयः ७ तैः तुल्ये तिथौ दर्शनवमीसप्तमीष्वामलकस्नानं न कार्यं तदुक्तम् । 'स्नातुर्जनस्य दशमी तनयं त्रयोदशीमर्थं निहंत्युभयमेवमपि द्वितीया । सप्तम्यर्निंदुनवमीषु च संपदिच्छुः स्नायात्कदाचिदपि नामलकैर्मनुष्यः ॥' ॥ २ ॥

दग्धा युग्मा विभूता गतवति तरणौ चापमीने घटोक्ष्णे कर्काजे स्त्रीनृयुग्मे मृगपतिसविषे तौलिनक्रे क्रमेण ॥ नंदाद्या रिक्तिकांतास्त्रिरजप्रमुखतः स्युश्चतुर्णां च पूर्णा नेष्टा सकूरराशेः प्रतिपदि च कुहौ दंतकाष्ठं न षष्ठ्याम् ॥ ३ ॥

दग्धा इति । विभूताश्चतुर्दशीरहिताः युग्मातिथयः द्वितीया चतुर्थी षष्ठ्यष्टमीदशमीद्वादश्यः क्रमेण दग्धाः स्युः किं सति तरणौ सूर्ये वक्ष्यमाणराशियुग्मे गतवति सति तद्यथा चापमीने तरणौ द्वितीया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दग्धा, चापमीनमिति समाहारद्वंद्वः । घटोक्ष्णे कुंभवृषयोस्तरणौ गते चतुर्थी दग्धा अत्रेतरेतरद्वंद्वः । कर्काजे कर्किणि मेषे तरणौ सति षष्ठी दग्धा, स्त्रीनृयुग्मे कन्यामिथुनयोरष्टमी दग्धा, मृगपतिसविषे सिंहवृश्चिके रवौ दशमी दग्धा, तौलिनक्रे तुलामकरे द्वादशी दग्धा निषिद्धा तदुक्तम् । 'मीने चापे द्वितीया च चतुर्थी वृषकुंभयोः । मेषकर्कटयोः षष्ठी कन्यायां मिथुनेऽष्टमी ॥ दशमी वृश्चिके सिंहे द्वादशी घटनक्रयोः । एताः स्युस्तिथयो दग्धा द्वौ द्वौ राशिस्थिते रवौ ॥' च परं नंदाद्या रिक्तिकांताश्चतस्रस्तिथयः त्रिवारं त्रिरावृत्त्या अजभमुखतां राशीनां स्युः प्राक् नंदा मेषस्य भद्रा वृषस्य जया मिथुनस्य रिक्तिका कर्कस्य चतुर्णां राशीनां पूर्णा प्रहरद्वयं द्वयं मेषादीनां पंचम्याः । एवं सिंहादीनां चतुर्णां षष्ठ्यादयस्तथा दशमी सिंहादीनां चतुर्णां पुनरेकादश्याद्याश्चतस्रो धनुरादिचतुर्णां राशीनां तिथयः । पुनः पूर्णा पूर्णमासीदर्शौ धनुरादीनां भवतः । एवं सपादतिथेरेको राशी राश्याधिकसंज्ञेयं सक्रूरराशेः, क्रूरेण रविकुजमंदराहूणामेकतमेन सहितो यो राशिस्तत्संबंधिनी या तिथिः सा नेष्टा शुभकार्ये च परं प्रतिपदि कुहौ दर्शे षष्ठ्यां दंतकार्यं न । तथा चोक्तम् । 'नष्टेदुषष्ठीप्रतिपत्सु धीमान् न जातु दंतोत्कषणं विदध्यात् । कुर्वन्नवाप्नोति तदा स नूनं लक्ष्मीकुलज्ञातिजयोपघातम् ॥' ॥ ३ ॥

भेशा दस्रांतकाग्निद्रुहिणशशिशिवा देवसूरीज्यसर्पाः पित्राख्याः स्युर्भगोऽथार्यमरविदिविषत्सूत्रकारानिलाश्च ॥ शक्राग्नी मित्र इंद्रो निर्ऋति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तनुभवो वारि विश्वे विधाता श्रीशो वस्वाख्य-
यादःपतिरजपदहिर्बुध्न्यपूषाभिधानाः ॥ ४ ॥

भेशा इति। एते भेशा भानां नक्षत्राणां ईशा ज्ञेयाः। ते के दस्रौ अश्विनीकुमरौ अश्विन्या अश्विपती, अंतको यमो भरण्याः, अग्निः कृत्तिकायाः, द्रुहिणो ब्रह्मा रोहिण्याः, शशी मृगशीर्षस्य, शिवो आर्द्रायाः, अत्रेतरेतरद्वंद्वः। देवसूः देवान् सूते सा देवसूरिति अदितिः पुनर्वसोः, इज्यो गुरुः पुष्यस्य. सर्पा आश्लेषायाः, पित्राख्याः पितरो मघायाः, भगः सूर्यविशेषः पूर्वाफाल्गुन्याः, अर्यमा उत्तराफाल्गुन्याः, रविर्हस्तस्य, दिविषत्सूत्रकारः दिविषदो देवाः तेषां सूत्रकारो वार्द्धुषीव विश्वकर्मा चित्रायाः, अनिलो वायुः स्वातेः, शक्राग्नी शक्रश्च अग्निश्च शक्राग्नी द्वावपि विशाखायाः, मित्रः सूर्यभेद अनुराधायाः, इंद्रो ज्येष्ठायाः, निर्ऋतितनुभवो राक्षसाः मूलस्य, वारि जलं पूर्वाषाढायाः, विश्वेदेवा उत्तराषाढायाः, विधाता अभिजितः, श्रीशो विष्णुः श्रवणस्य, वस्वाख्या वसवो धनिष्ठायाः, यादःपतिर्वरुणः शततारकायाः, अजपत् अजैकपाद् महादेवभेदः पूर्वाभाद्रपदायाः, अहिर्बुध्न्यं उत्तराभाद्रपदायाः, पूषा सूर्यभेदो रेवत्यारष्टाविंशतिदेवतास्तन्नाम्ना भानां नामानि कल्प्यानि ॥ ४ ॥

स्वात्यादित्यहरित्रयं चरचलं धात्रोत्तराध्रुस्थिरः
क्रूरोग्रं पितृपूर्विकांतकमथ द्वीशानले मिश्रके ॥
हस्तेज्याश्वभिजिल्लघुर्मृगशिराश्चित्रांत्यमैत्रं मृदु
ज्येष्ठार्द्रोरगमूलमेतदुदितं तीक्ष्णं शशीनारतः ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वातिः आदित्यं अदितेरेदमादित्यं पुनर्वसुः, हरित्रयं हरिशब्देन हरिभं श्रवणो ग्राह्यः । इदं सांकेतिकं शास्त्रं नाभैकदेशग्रहणे नामग्रहणं श्रवणत्रयं श्रवणधनिष्ठाशततारा एतत् नक्षत्रपंचकं चरचलसंज्ञं भवति । धात्रं रोहिणी उत्तरास्तिस्र एताः ध्रु ध्रुवः स्थिराश्च भवंति । पितृमघापूर्विकास्तिस्रः अंतकं भरणी एतत्पंचकं क्रूरमुग्रसंज्ञं भवति । अथ द्वीशं विशाखा अनलं कृत्तिका एते मिश्रसंज्ञे, हस्तः ईज्यं पुष्यः अश्वि अश्विनी अभिजित् अयं गणो लघुर्भवति, मृगशिरः चित्रा अंत्यं रेवती मैत्रमनुराधा एतत् चतुष्कं मृदु । ज्येष्ठा आर्द्रा उरगमाश्लेषा मूलं एतत्तीक्ष्णं उदितं कथितं नामसप्तकं चरचलादि एतत्, शशी चंद्रः इनः सूर्य आरो भौमः, ततो ज्ञेयं एतदुक्तं भवति चंद्रश्चलश्चरः, रविः स्थिरो ध्रुवः, भौमः क्रूरोग्रः, बुधो मिश्रः, गुरुर्लघुः, शुक्रो मृदुः, शनिस्तीक्ष्णः, एवं नक्षत्रनामानि । तच्चोक्तम् 'रविः स्थिरः शीतकरश्चरश्च महीज उग्रः शशिजश्च मिश्रः । लघुः सुरेज्यो भृगुजो मृदुश्च तीक्ष्णोऽर्कसूनुः कथितो मुनींद्रैः ॥' ॥ ५ ॥

द्वीशास्त्रीण्युदकोडुतो वसुभतः पौष्ण्यात्कभा-
ज्जीवभादार्यम्णाद्रवितस्त्यजेद्यममघे त्वाष्ट्रद्विदैवे
तथा ॥ वैश्वार्द्रे वसुमूलकेऽनलशते ज्येष्ठाकभे-
बुद्ध्यं सूर्येष्टौ विदि पंचवारतिथिजान् विश्वान्
समस्तेष्विति ॥ ६ ॥

रवितो रविवारात् क्रमेण सप्तवारेषु एतानि भानि त्यजेत् शुभकर्मेष्विति शेषः । तत्र रविवारे द्वीशास्त्रीणि विशाखायास्त्रीणि विशाखा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुराधा ज्येष्ठा इति त्रीणि भानि त्यजेत् । सोमवारे उदकोद्भुतः पूर्वाषाढायास्त्रीणि पूर्वाषाढोत्तराषाढाऽभिजित् । भौमवारे वसुभतो धनिष्ठायास्त्रीणि धनिष्ठाशतभिषक्पूर्वाभाद्रपदास्त्यजेत् । बुधवारे पौष्णाद्रेवत्यास्त्रीणि रेवत्यश्विनीभरणीस्त्यजेत् । गुरुवारे कभाद्रोहिण्यास्त्रीणि रोहिणीमृगार्द्रास्त्यजेत् । शुक्रवारे जीवभात् पुष्यात्रीणि पुष्याश्लेषामघास्त्यजेत् । शनिवारे आर्यम्णात् उत्तराफाल्गुन्यास्त्रीणि उत्तराफाल्गुनीहस्तचित्रास्त्यजेत् । एतेन उत्पातमृत्युकाणयोगा उक्ताः । तथा तथैव रवितो द्वे द्वे भे त्यजेत् ते के यममघे भरणीमघे रविवारे त्यजेत्, सोमवारे त्वाष्ट्राद्विदैवे चित्राविशाखे, भौमवारे वैश्वार्द्रे उत्तराषाढाऽर्द्रे, बुधवारे वसुमूलके धनिष्ठामूले त्यजेत्, गुरुवारेऽनलशते कृत्तिकाशततारके त्यजेत् । भृगुवारे ज्येष्ठाकभे ज्येष्ठारोहिण्यौ, शनिवारे बुधद्वयं पूर्वाषाढाद्वयं पूर्वाषाढोत्तराषाढे त्याज्ये अत्र त्याज्यप्रकरणाद्यस्मिन् वारे यत् त्याज्यं तदेवमुक्तं । तत्र शनिवारे केचन रेवतीं हस्तं च जन्मभं यमघंटयोगाख्याया वदंति तन्निर्मूलम् । यतः हस्ते मृत्युयोगस्य प्राक्कथनात् प्राचीनाचार्यत्रिविक्रमेण लिखितमस्ति अतः त्रिविक्रममते शनौ त्याज्यं 'शनेर्द्वे वर्ज्ययाषाढे द्वादशाभात्रयं तथा।' तेनाषाढाद्वयं निषिद्धं अथ सूर्ये रविवारे प्रथमा सप्तमी तिथी ७ अनयोर्योगेऽष्टौ भवंति । एवं विदि बुधे तूर्ये वारे ४ प्रतिपत्तिथी अनयोर्योगे पंच त्याज्याः एवं समस्तेषु तिथी वारजान् त्रयोदश त्यजेत् एवं द्वादशीं रविवारे एकादशीं सोमवारे दशमीं भौमवासरे नवमीं बुधवासरे अष्टमीं गुरौ सप्तमीं शुक्रे षष्ठीं शनिवारे त्यजेदिति संवर्त्तक्रकचावुक्तौ । इत्युत्पातमृत्युकाणजन्मभयमघंटसंवर्त्तक्रकचयोगाः ॥ ६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रात्र्यर्द्धं द्युयुतं स पादमनुयुक् वारप्रवृत्तिस्ततो
होरा सार्द्धघटिद्वया दिनपतेः षष्ठस्य षष्ठस्य सा ॥
तुर्याद्रिद्विशराष्टरामरसकं यामार्द्धमुज्झेद्रवोस्ति-
थ्यंशः कुलिको मनूत्क्रमसमो घस्रे निरेको निशि॥७॥

रात्रेरर्द्धं रात्रीणामर्द्धं द्युयुतं दिनमानेन युतं कार्यं पश्चात्सपादः पंचदशपलसहिताः चतुर्दशघटिकास्ताभिः १४ युक् युक्तं कार्यं तदा वारप्रवृत्तिः स्यात् षष्टितो न्यूने रात्रिशेषे षष्टितोऽधिके सूर्योदयादर्द्धं ततो वारप्रवृत्तेः सकाशात् होरा भवति किंलक्षणा सार्द्धघटिद्वयात् सार्द्धं घटिद्वयं यस्याः सा सा दिनपतेर्दिनवाराद्ग्रहाणां होरा भवति तद्यथा प्रथमा दिनविभोः द्वितीया तस्मात्षष्ठस्य ततोऽपि षष्ठस्य एवं चतुर्विंशति होरा अहोरात्रे स्युः। तथा च श्रीपतिः। 'वारप्रवृत्ते-र्घटिकाद्विनिघ्नाः कालाख्यहोरापतयः शराप्ताः । दिनाधिपाद्यारविशु-क्रसौम्याः शशांकसौरीज्यकुजाः क्रमेण ॥' इति दिनाधिपाद्गणनीयाः तासां मध्ये चंद्रबुधजीवशुक्राणां होराः श्रेष्ठाः । रविकुजमंदानां होराः सामान्याः अतो मध्याः। 'यस्य ग्रहस्य यद्वारे किंचित्कर्म प्रकी-र्त्तितम्। तत्तस्य कालहोरायां सर्वमेव विधीयते॥' इति श्रीपत्युक्तिः। अथ रवेः सकाशात् यामार्द्धं त्यजेत् कतितमं तुर्याद्रिद्विशराष्टरामर-सकं तुर्यं चतुर्थं रविवारे सोमवारेऽद्रिसप्तमितं भौमे द्वि २ बुधे शरमितं पंचमं जीवे अष्टमितं शुक्रवारे राममितं त्रितयं शनिवारे रसमितं षष्ठं इयं वारवेला निषिद्धा पुनः रवेः सकाशात् तिथ्यंशः मुहूर्तः। दिनमानस्य पञ्चदशभागो मुहूर्तः स कुलिको भवति। घस्रे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिवसे कतिमितः मनूत्क्रमसमः मनुतश्चतुर्दशतः उत्क्रमेण व्यस्ततया समः समसंख्यः स कुलिको ज्ञेयः ।। रविवारे चतुर्दशो मुहूर्त्तः सोमवारे द्वादशः, भौमवारे दशमः, बुधवारेऽष्टमः, गुरुवारे षष्ठः, शुक्रवारे तुर्यः, शनिवारे द्वितीयः, निशि रात्रौ निरेकः, रविरात्रौ त्रयोदशः, सोमरात्रौ चैकादशः, भौमरात्रौ नवमः, बुधरात्रौ सप्तमः, गुरुरात्रौ पंचमः, शुक्ररात्रौ तृतीयः, शनिरात्रौ प्रथमः, एते कुलिकाः शुभकार्ये निषिद्धाः तथाचोक्तम् । 'मन्वर्कदिग्वस्त्रृतुवेदपक्षैरर्कान्मुहूर्तैः कुलिका भवंति । दिवा निरेको ह्यथ यामिनीषु ते गर्हिताः कर्मसु शोभनेषु ॥' इति । इति वारप्रवृत्तिहोरार्द्धयामकुलिकाः । यदुक्तं श्रीपतिना 'यस्य ग्रहस्य वारेऽपि यत्कर्म परिकीर्तितम् । तत्तस्य कालहोरायां सर्वमेव विधीयते ॥' इति आवश्यकृत्ये श्रीपतिवचने ॥ ७ ॥

शुक्लेऽब्धीशमिते तिथौ परदले प्रागष्टमीराकयो-
र्विष्टिः कृष्णदले त्रिदिक्षु परतः प्राक् सप्तमीभू-
तयोः ॥ तद्वक्रं शरदोर्नगांबुधिवसुत्र्यंगैकया-
मादितः पुच्छं शस्तमिभेंदुषड्गुणनगद्वीष्वब्धि-
यामात्यये ॥ ८ ॥

शुक्ले इति । शुक्ले पक्षेऽब्धीशमिते चतुरेकादशमिते तिथौ चतुर्थ्येकादश्योः परतः पश्चिमार्द्धे विष्टिः अष्टमीराकयोस्तत्रैव शुक्ले प्राग्दले विष्टिः कृष्णदले कृष्णपक्षे त्रिदिक्षु तृतीयादशम्योः पश्चिमार्द्धे विष्टिः सप्तमीभूतयोः परतः कृष्णे प्राग्दले विष्टिः तस्याः विष्टेः वक्रं शरदोर्नगांबुधिवसुत्र्यंगैकयामादितः पंचघटिकात्मकं वक्रं भवति अत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मानक्रमेण विष्टयो ग्राह्याः चतुर्थ्यष्टम्येकादशीपौर्णमासीतृतीया-सप्तमीचतुर्दशीषु चतुर्थ्यां पंचमप्रहरे मुखं अष्टम्यां द्वितीययामादौ, एकादश्यां सप्तमयामादौ, पूर्णिमायां चतुर्थयामादौ, कृष्णतृतीयायां अष्टमयामादौ, सप्तम्यां तृतीययामादौ, दशम्यां षष्ठयामादौ, चतुर्दश्यां प्रथमयामादौ, पंचघटयात्मकं विष्टेर्मुखं भवति, तत्पुच्छं तत्कदा भवेत् चतुर्थीतः. क्रमेण इभेंदुषड्गुणनगद्वीष्वाब्धियामात्यये चतुर्थ्यामष्टमयामांते घटिकात्मकं विष्टेः पुच्छम् । अष्टम्यां प्रथमयामांते, एकादश्यां षष्ठयामांते, पौर्णमास्यां तृतीययामांते, सप्तम्यां सप्तमयामांते, दशम्यां द्वितीययामांते विष्टेः पुच्छं, चतुर्दश्यां चतुर्थयामांते विष्टेः पुच्छम् । तथा चोक्तम् । ' दशम्यामष्टम्यां प्रथमघटिकापंचकपरं हरिद्युःसप्तम्योस्त्रिदशघटिकातस्त्रिघटिकम् । तृतीयाराकायां कुयमघटिकाभ्यः परतरं ध्रुवं विष्टेः पुच्छं शिवतिथिचतुर्थ्योस्तु विगमे ॥ ' विष्टे रत्नमालायामपि मुखमेव यामादौ कथितमस्ति तदंगमपि । ' नाड्यस्तु पंच वदनं गलकस्तथैका वक्षे दशैकसहिता घटिकाश्चतस्रः । नाभिः कटी षडथ पुच्छलताच्च तिस्रो विष्टेर्बुधैर्निगदितोऽगविभाग एषः ॥ ' उक्तं च । ' मुखे कार्यध्वस्तिर्भवति मरणं चापि गलके धने हानिर्वक्षःस्थलकटितटे बुद्धिविलयः । कलिर्नाभीदेशे विजयमथ पुच्छे निगदितो शरीरे भद्रायाः पृथागेति फलं पूर्वमुनिभिः ॥ ' अथ विष्टेः स्वरूपमाह । ' दैत्येंद्रैः समरे सुरेषु विजितेष्वीशः क्रुधा दृष्टवान् स्वं कार्यं कलिनिर्गता खरमुखी लांगूलिनी च त्रिपात् । विष्टिः सप्तभुजा मृगेंद्रगलका क्षामोदरी प्रेतगा दैत्यघ्ना मुदितैः सुरैस्तु करणप्रांते नियुक्ता सदा ॥ इति विष्टिः ॥ ८ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रुद्राशीविषमित्रपितृवसुवार्विश्वेभिजित्केंद्रपाः शक्राग्नी निर्ऋतिर्दिने तिथिलवाः पाश्यर्यमाख्यो भगः॥ रात्रौ शंभुरजांघ्रितस्त्रियमगादास्राद्विरौद्रा हरिः सूर्यस्त्वाष्ट्रसमीरणानि च भजे कार्ये स्मृताः सिद्धिदाः ॥ ९ ॥

रौद्रेति । एते दिने तिथिलवाः मुहूर्ता भवंति, दिनमानस्य पंचदशो विभागः मुहूर्तो ज्ञेयः स मुहूर्तः क्रमेण रुद्रादीनां पंचदशदेवतानां वा तत्तन्नामकनक्षत्रसंबंधी भवति । ते के रुद्राशीविष इत्यादयः । सर्वदा प्रथममुहुर्तः रुद्रस्य भवति, आर्द्रासंबंधीत्यर्थः, द्वितीयः आशीविषाणां सर्पाणां आश्लेषासंबंधी भवति, पंचमो वसुदैवतो धनिष्ठासंबंधी भवति, षष्ठो वार्दैवतः पूर्वाषाढासंबंधी भवति, सप्तमो विश्वदैवत उत्तराषाढासंबंधी भवति, अष्टमोऽभिजिन्मुहूर्तः, नवमः कर्मदैवतो रोहिणीसंबंधी भवति, दशमः इंद्रदैवतो ज्येष्ठासंबंधी भवति, एकादशः शक्राग्निदैवतो विशाखासंबंधी भवति, द्वादशो नैर्ऋतिदैवतो मूलसंबंधी भवति, त्रयोदशः पाशिदैवतो वरुणदैवतः शततारकासंबंधी भवति, चतुर्दशो यमदैवतो उत्तराफाल्गुनीसंबंधी भवति, पंचदशो भगदैवतः पूर्वाफाल्गुनीसंबंधी भवति, एते दिने मुहूर्ताः भवंति । रात्रौ शंभुरार्द्राः, अजांघ्रितः पूर्वाभाद्रपदा त्रितस्त्रयं पूर्वाभाद्रपदा उत्तरभाद्रपदा रेवती, दास्राद्विरौद्रा आर्द्रार्नगहिताः, सप्त अश्विनी भरणी कृत्तिका रोहिणी मृगशिरः पुनर्वसुः पुष्यः हरिः श्रवणः सूर्यो हस्तः त्वाष्ट्रं चित्रा समीरणो वायुदैवतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वाती एते मुहूर्ताः निजभजे स्वनक्षत्रभवे कार्ये सिद्धिदाः स्मृताः । आवश्यकं कार्यं यत्र नक्षत्रे कथितं वर्तते तस्य मुहूर्ते कर्तव्यम् । इति दिनरात्रिभवास्त्रिंशन्मुहूर्ताः । तदुक्तं रत्नमालायाम् 'यस्मिन् धिष्ण्ये यच्च कर्मोपदिष्टं तद्दैवत्ये तन्मुहूर्तेऽपि कार्यम् ।' इति लोके हि स्वामिसदृष्टं सेवके प्रयुज्यमानं दृश्यते अतो देवतासदृष्टं तन्नक्षत्रे कार्यमिति तिथ्यादिषूपचर्यते तथा च दृष्टयोगदर्शनम् ॥ ९ ॥

लग्नाढ्यास्तिथयो गता नवहृताः खत्रीष्वगे शेषके न स्यात्पंचकमेककके मृतिरथो हौताशनं स्याद्द्वयोः ॥ तुर्ये राजकमंगके हृतिरथोऽष्टाभी रुगाख्यं त्यजेदुद्वाहे सदनेषु सेवनविधौ मार्गे व्रतेषु क्रमात् ॥ १० ॥

लग्नाढ्येति । मासादितो यास्तिथयः गताः तिथयो लग्नाढ्याः कार्याः आरंभकालीनलग्नाः केन युता नवहृताः नवभिर्हृते भक्ते ख० त्रि ३ इषु ५ अगे ७ शेषके पंचकं न भवति । एकशेषे मृतिर्भवति मृत्युपंचकं भवेत् । अथ द्वयोः शेषयोः सतोः हौताशनं वह्निपंचकं भवेत् । तुर्ये चतुष्के शेषके राजपंचकं भवति । अंगके षट्शेषे हृतिश्चोरपंचकं भवेत् । अष्टाभिः शेषे रुगाख्यं भवेत् रोगपंचकं भवति । एतानि क्रमात् उद्वाहे विवाहे मृतिपंचकं, सदनेषु हुताशनपंचकं, सेवाविधौ राजपंचकम् मार्गे हृतिपंचकं त्याज्यं, व्रतेषु व्रतबंधादिषु रुगाख्यं रोगपंचकं त्यजेत् । उक्तं च । 'व्रते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रोगं पथे चौरं सेवायां राजपंचकम् । गृहे चाग्निं परित्यज्य विवाहे मृत्युपंचकम् ॥ ' इति बाणपंचकम् ॥ १० ॥

गंशूव्यातिविवेषु षट्शरनवांगत्रित्रिनाडीः पुरा सर्वा-
त्यव्यतिपातकौ च परिघार्धं पूर्वमुज्झेच्छुभे ॥
योगेष्वेष्विनभाद्विधुर्विषमभे विष्कृक्षयुक्तेर्गला स्या-
च्चंडीश्वरशस्त्रपात इह सागंशूव्यवैहांतभे ॥ ११ ॥

गंशूव्येति । एषु योगेषु पुरा प्रथमाः एताः नाडीः त्यजेत्, केषु काः गं गंडः शू शूलः, व्या व्याघातः, अति अतिगंडः, वि विष्कंभः व वज्रयोगः, एषु पुरा पूर्वाः षट्शरनवअंगत्रित्रिनाडीः त्यजेत् । शुभे शुभकार्ये सर्वौ च तौ अन्त्यव्यतीपातकौ त्यजेत् वैधृतिव्यतीपातौ सर्वावपि । पूर्वं परिघार्द्धं परिघस्य पूर्वार्धं इत्यर्थः । एषु प्रागुक्तयोगेषु गंशूव्यातिविववैव्यपरिघेषु सत्सु इनभात् सूर्यभात् विष्कृक्षयुक्ते अभिजित् तत्सहितगणिते सति विषमभे यदा विधुर्भवति तदाऽर्गला एकार्गलयोगो भवति । इह चंडीश्वरशस्त्रपातः स्यात् इह क सा साध्यः गं गंडः शू शूलः व्य व्यतीपातः वै वैधृतिः ह हर्षणः एषां योगानां अंते यद्भं तत्र । तथा चोक्तम् ' साध्यहर्षणशूलानां वैधृतिव्यतिपातयोः । यद्भं गंडस्य चांते स्यात्तत्पातेन निपातितम् ॥' एमेवैकार्गलहरायुधयोगौ कथितौ इत्येकार्गलचंडायुधौ ॥ ११ ॥

अर्कत्रीभनखेषु भेषु दिनकृद्भौमार्क्यगूनां पुरो
लत्ता सप्त च तिर्यगूर्द्धगतिका रेखालिखेदग्नि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भात् ॥ वेधोऽत्रैकगयोरथोद्वहविधौ पंचोर्द्धतिर्य-
ग्गता द्वे द्वे कोणगतेऽत्र विध्यति खगाः कोणे
द्विरेखेऽग्निभात् ॥ १२ ॥

दिनकृद्भौमार्क्यगूनां रविभौमशनिराहूणां पुरः पुरस्तात् एतेषु मेषु नक्षत्रेषु लत्ता स्यात् । एतेषु केषु अर्कत्रीभनखेषु अर्का द्वादश त्रीणि इभा अष्टौ नखा विंशतिस्तेषु अत्राशुभानां लत्ता कथिता यतः । ' उडुनि निर्दलिते शुभलत्तया न फलमस्ति बलस्य लत्तया । अशुभलत्तितमात्ति तदूढयोर्धनसुतानसुतायकरं परम् ॥ ' च परं तिर्यगूर्ध्वगतिका सप्त रेखाः लिखेत् अत्रैकरेखागतयोर्ग्रहयोः सतोर्वेधो भवति, स वेधो व्रतबंधदेवप्रतिष्ठाचौलादिषु त्याज्यः । अथोद्वहविधौ विवाहे पंच पंच ऊर्ध्वतिर्यग्गता रेखा लिखेत्, द्वे द्वे रेखे कोणगते लेख्ये अत्रापि खगो ग्रहः कोणस्य ईशकोणस्थद्विमिताया रेखायाः तत्राग्निभात् स्थितो विध्यति; तत्र सर्वेषामेव वेधस्त्याज्यः। तत्र रोहिण्यां कथं वेधः स्यात् अभिजिति ग्रहे स्थिते रोहिणी विद्धा भवति अभिजित्कथं भवति वैश्वदेवतः चतुर्लवः श्रवणस्य पंचभू १५ लवः इह अभिजिन्निति उत्तराषाढायाः प्रांत्योंऽघ्रिः श्रवणस्य पंचदशो विभागः एतदभिजिद्भं भवति तत्रस्थे खेटे रोहिणीनां वेधो भवति । इति लत्तापंचशलाकावेधविचारः ॥ १२ ॥

जन्मर्क्षाद्दिनभोन्मितिर्नवहृतास्तारास्त्रिबाणाद्रयो
नेष्टास्तद्बलतो विधुर्विधुबलादर्कोऽर्कवीर्यात्परे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयाः संक्रमणे फलायुतगमे सूर्यर्क्षतश्चंद्रभं भक्तागैस्त्रिरसे भ्रमोऽबरयमे शेषे शुभश्चाडलः॥१३॥

स्वकीयजन्मभात् जन्मनक्षत्रात् दिनभोन्मितिः दिननक्षत्रस्य संख्या कार्या, सा नवहृता नवभिर्हृता कार्या शेषा शेषमिता तारा भवति । तत्र नव ताराः शेषाः कस्माद्भवंति शून्यशेषमिताः नवसु त्रिबाणाद्रयस्तृतीयापंचमीसप्तम्यो नेष्टाः शुभा न । तथा चोक्तम् । 'जन्मसंपद्विपत्क्षेमाः प्रत्यरिः साधका वधा । मैत्रातिमैत्रास्ताराः स्युस्त्रित्ववृत्त्या न चैव हि ॥' तद्बलतो विधुः ताराबलाद्विधुः फलदो भवति यादृशी यद्दिने तारा भवति तद्दिने चद्रस्तादृशं फलं ददाति, विधुबलादर्कः यादृशे चंद्रे सूर्यः संक्रमणं करोति तादृशं फलं सूर्यो ददाति, अर्कवीर्यात् परे भौमादयः षट् संक्रमेण राशिसंक्रमेण फलदा ज्ञेयाः, यादृशे सूर्ये भौमबुधगुरुशुक्रशनिराहवो राशिसंक्रमणं कुर्वंति तादृशं स ग्रहः फलं ददाति तु पुनः गमे गमने सूर्यर्क्षतः सूर्यभात् चंद्रभं यावत्तमं भवति तदगैः सप्तभिः भक्त्वा शेषं कार्यं त्रिरसे त्रिरसमिते शेषे भ्रमः भ्रमणयोगो भवति । अंबरयमे शून्यद्विशेषे अडलो योगो भवति । भ्रमोऽप्यशुभ अडलोऽप्यशुभः॥ इति त्याज्यप्रकरणम् ॥ १३ ॥

रेवत्यां स्थिरमैत्रमूलमृगभे स्वातौ मघायां करे सौम्येऽर्के शफरोज्झिते तनुषडष्टेंदुं खलैर्युग्घतम् ॥ विद्धं भं कुलिकार्गलापमतुलां रिक्तां कुहूं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पक्षातिं विष्टिं यामदलं कुयोगकुदिनं त्यक्त्वा विवाहः शुभः ॥ १४ ॥

रेवत्यां स्थिराणि रोहिण्युत्तरभानि मैत्रमनुराधा मूलं मृगभं एषां समाहारः तस्मिन्स्वातौ मघायां करे हस्ते, पुनः क्व सौम्येऽर्के सौम्यायनगते रवौ किंलक्षणे सौम्यायने शफरोज्झिते शफरो मीनस्तदुज्झितेऽर्केण रहिते गोधूलिकलग्नं कुर्यात् । किं कृत्वा तनुषडष्टेंदुं त्यक्त्वा तनौ षष्ठेऽष्टमे चंद्रं त्यक्त्वा खलैः सूर्यभौमशनिराहुभिर्युक्युक्तं हतं लत्तितं विद्धं पंचशलाकचक्रे विद्धं भं नक्षत्रं त्यक्त्वा कुलिको मनूत्क्रमसम इत्यादि अर्गला एकार्गलयोगः योगेष्वेष्विनभादित्यादि अपमतुलां क्रांतिसाम्यं त्यक्त्वा क्रांतिसाम्यं तु ब्रह्मतुल्ये पाताधिकारे समायाति । अन्यच्च 'शुक्ले खाब्धि ४० घटीष्वस्ति पातो ध्रुवस्य दिक्ष्व १० पि । प्रत्यब्दं गो ९ पलैर्हीनः खाद्रितिथ्युन्मिताच्छकात् १५७० ॥' कुहूममावास्यां रिक्तां अमासांनिध्यात्कृष्णां चतुर्दशीं पक्षतिं प्रतिपदं तदुक्तम् । 'अमातिथिः पार्श्वतिथिद्वयेन समं न मांगल्यमुपादधाति ।' इति विष्टिं भद्रां त्यक्त्वा यामदलं तुर्याद्रिद्विशराष्टमरसकमित्यादि यामदलं त्यक्त्वेत्यर्थः। कुयोगो मृत्युयमघंटादिः कुदिनमवमं तमपि त्यक्त्वा विवाहो भवति पुनः क्व शफरोज्झिते मीनसंक्रांतिरहिते सौम्येऽर्के उत्तरायणगे सूर्ये अत्रोत्तरायणग्रहणं सौरमासादरार्थं तथा चोक्तम् । 'रवेर्मीनमकरादिषड्ग्रही करग्रहे मंगलकृन्मृगीदृशाम् ।' इति केशवाकः । तथापि सौम्यायनवशात्पौषचैत्रयोः शुक्लपक्षे न विवाहः तथा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चोक्तं विवाहप्रकाशे । ' पौषे मृगगे सूर्ये परपक्षे चैत्रमास्यजर्क्षेऽर्के । उद्वाहः कर्तव्योऽन्यथा भवेत्तावनिष्टफलौ ॥ ' तत्रैव ' कार्तिकमासे शुद्धिं गुरोर्विलोक्य रवेश्चंद्रबलम् । अक्रूरयुते धिष्ण्ये देवोत्थानावशाहे स्यात् ॥ ' अत्र ग्रंथांतरे वक्ष्यमाणश्लोके चापार्कमीनार्कयाम्यायनसिंहस्थगुरुभृगुजीवयोरस्तबाल्यवृद्धत्वातिचारवक्रसमये परं सत्कार्यं न स्यादिति वक्ष्यति तस्मादत्र विवाहादौ गुरुशुक्रयोः शिशुत्वजरत्वे त्याज्ये तद्यथा शिशुजरत्वमाह । ' शिशुजरत्वमहान्युदयोऽस्तयोर्दश चतुर्दश चांगिरसः स्फुटम् । उशनसो दशपंच च पश्चिमे गतिवशाच्चिदशाहमपश्चिमे ॥ अष्टाविंशतिवासरान् सुरगुरोर्वक्रातिचारे त्यजेत्सिंहे पञ्चनवांशकान् मृगगते पंचैव नीचांशकान् । बाले वृद्धदशां गतेऽथ नियतं लुप्ताख्यसंवत्सरं सर्वं चास्तमिते सभीतिरहितः प्रोक्तं हि गर्गेण च ॥ अष्टमे द्वादशे वर्षे मासत्रयगते सति । विवाहं तत्र कुर्वीत गर्भमासविमिश्रणात् ॥' इत्यादि सर्वं विचार्य लग्नं कर्तव्यम् ॥ १४ ॥

लग्ने मानवराशिगे नवलवे मंदाच्चतुर्वर्जिते
षष्ठे लग्नपचंद्रशुक्ररहिते रंध्रे विधोः पंचभिः ॥
हीनेऽर्थेंदुगुरू समौ मदगतौ पापोत्थकर्त्तर्यपि
त्याज्या लग्नशशांकयोस्तनुलवौ तन्नाथदृष्टौ शुभौ १५

अथ घटिकालग्नमाह—लग्न इति । पूर्वश्लोके एषु योगेषु विवाहः शुभ इत्युक्तमस्ति तत्र लग्नशुद्धिमाह । लग्ने मानवराशिगे मनुष्यराशिलग्ने मनुष्यराशय इति तुलामिथुनप्रमदाधनुःप्रथमखंडमखंडफलं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जगुः वा मानवराशिगे नवलवे नवांशे लग्नस्य त्रिंशदंशाः तेषां नवांशः अंशः ३ कला २० एवं राशौ नवनवांशा भवंति तेषां नवांशानां गणना चतुर्भ्यो राशिभ्यो भवति तद्यथा 'मेषात् मेषाश्चसिंहानां नक्राद्वृषमृगस्त्रियः। घटात्कुंभात्रिजूकानां 'कर्कान्मीनालिकार्णिकाम् ॥ ' अनेन क्रमेण मानवराशिलवे मिथुनकन्यातुलाधनुषामन्यतमस्य नवांशे लग्नगे। किंभूते लग्ने आर्कैः शनेः सकाशाच्चतुर्ग्रहावर्जिते शनिरविचंद्रभौमवर्जिते षष्ठे भवने चंद्रलग्नपतिशुक्ररहिते षष्ठे लग्नपो भंगदः चंद्रशुक्रौ च अष्टमे विधोः सकाशात्पंचभिर्हीने चंद्रमंगलबुधगुरुशुक्रवर्ज्या इत्यर्थः । अर्थेंदुगुरुचंद्रजीवौ तत्र लग्ने मदगतौ सप्तमगतौ समौ न निषिद्धौ न श्रेष्ठौ अन्ये सप्त ग्रहा जामित्रे भंगदाः। तथा चोक्तं त्रिविक्रमीचार्यैः। 'त्याज्या लग्नेऽब्धयो मंदात्षष्ठे शुक्रेंदुलग्नपाः। रंध्र चंद्रादयः पंच सप्तमेऽब्जगुरू समौ ॥ अथ लग्नशशांकयोः पापोत्थकर्त्तरी त्याज्या लग्नं पापद्वयमध्ये भवति चंद्रो वा पापद्वयमध्ये भवति एतद्द्वयं त्याज्यम् । तदुक्तम् । 'खलकृता तनुरोहिणिनाथयोर्हरधरा विधुरां कुरुते वधूम् । ' तनुलवौ लग्ननवांशौ तन्नाथदृष्टौ शुभौ । इति विवाहमुहूर्तः ॥ १५ ॥

स्वाता मूललघुध्रुवे मृदुमघाकर्णे तथा वासवे
रिक्तां प्रोज्झ्य च भद्रिकां रविबुधक्षोणीजवारां-
स्तथा ॥ वध्वा वेश्मनि वेशनं शुभकरं शुक्रं
पुरो दक्षिणं त्यक्त्वाऽब्दे विषमे द्विरागमवि-
धिर्यात्रातिथौ प्रोक्तभे ॥ १६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वाताविति । एषु योगेषु वध्वा नवोढायाः गृहप्रवेशः शुभो भवति, क्व स्वातौ मूललघुध्रुवे मूलं लघूनि च हस्तेज्याश्वाभिजितानि, ध्रुवाणि च रोहिण्युत्तरात्रयं एषां समाहारस्तत्र, मृदुमघाकर्णे मृदूनि मृगशिरश्चित्रांत्यमैत्राणि च मघा च कर्णं श्रवणश्च एषां समाहारस्तत्र, तथा वासवे धनिष्ठायां तत्र त्याज्यमाह । रिक्तां च भद्रिकां च भद्रातिथिः तथा रविबुधभौमवारान् प्रोज्झ्य त्यक्त्वा । अथ द्विरागमनमुहूर्तमाह । अब्दे विषमे तृतीये पंचमे शुक्रं पुरो दक्षिणं त्यक्त्वा द्विरागमविधिः प्रोक्तः यात्रातिथौ रिक्तावर्जिततिथौ प्रोक्तभगणे स्वातौ मूलेत्यादिनोक्तैः अत्र देशाचाराद्दीपोत्सवे द्विरागमं कुर्वंति तत्र पठंति । 'न शुक्रदोषो न च जीवदोषस्तारावलं चंद्रबलं न योज्यम् । द्विरागमादौ नवकन्यकाया दीपोत्सवे मंगलमामनंति ॥ ' इति वधूप्रवेशद्विरागमौ ॥ १६ ॥

मासा भाद्रमधूर्जपौषशुचयः पर्वाष्टमी द्वादशी
रिक्ता षष्ठिकयान्विता खलदिनान्युग्रर्क्षमिश्रेंद्रभम् ॥
सर्पार्द्राः प्रथमार्त्तवे न शुभदा संध्या च रिक्ताष्टमी
तीक्ष्णाश्व्यंत्यमघानलंकुदिवसं त्यक्त्वा तदीयाप्लुवः १७

इति । एते पदार्थाः नवोढायाः प्रथमार्तवे प्रथमरजोदर्शने भवंति, एते के भाद्रमधूर्जपौषशुचयो मासाः मधुः चैत्रः कः शुचिराषाढ एते पंच मासाः नेष्टाः । पर्वणी पौर्णष्टमी द्वादशी रिक्ता किंलक्षणाः षष्ठिकान्विताः षष्ठी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सहिता इत्यर्थः । खलादिनानि रविभौमशनिवारा नेष्टाः उग्रर्क्षपितृपूर्विकांतकं मिश्रे द्वीशानले इंद्रभं ज्येष्ठा सर्पः आश्लेषा आर्द्रा च परं संध्या एते पदार्थाः प्रथमार्तवे न शुभदा भवंति । एतेष्वेव जायते तदा कौशिकोक्ता शांतिर्लिखितास्ति सा कर्तव्या । तदनंतरं तया ऋतुस्नानं कर्तव्यम् । तत्र शुद्धिमाह । रिक्तातिथिरष्टमी तीक्ष्णं ज्येष्ठार्द्रोरगमूलम् अश्वि अश्विनी अंत्यं रेवती मघा कृत्तिका कुदिवसं रविभौममंदवारं त्यक्त्वा तदीयस्तस्या अयं आप्लवः स्नानं ऋतुमत्या मलस्नानं शुभमिति । इति प्रथमार्तवऋतुस्नाने ॥ १७ ॥

त्यक्त्वा मूलमघांत्यमादिमनिशं श्राद्धस्य घस्रं कुहूं
पक्षार्द्धे च चतुर्दशीं प्रथमतो रात्रीश्चतस्रो मुदा ॥
स्वीयां योषितमार्त्तवे समतमीष्विंदौ शुभे शोभनैः
खेटैः कंटककोणगैस्त्र्यरिभवे पापैर्नृयोगेष्वियात् १८

त्यक्त्वेति । आर्त्तवे ऋतुकाले स्वीयां योषितं स्वकीयप्रियतमां मुदा हर्षणेयात् गच्छेत् क्व समतमीषु समरात्रिषु षष्ठ्यष्टमीदशमीद्वादशीचतुर्दशीषु किं कृत्वा प्रथमतः ऋतुकालात् चतस्रो रात्रीः त्यक्त्वा च मूलं मघां रेवतीं त्यक्त्वा श्राद्धस्य नैमित्तिकस्य पूर्वरात्रिं तथा तदहोरात्रं च त्यक्त्वा कुहूं अमां च परं पक्षार्धमष्टमीं चतुर्दशीं च त्यक्त्वा क्व सति इंदौ शुभे चंद्रबले सति शोभनैश्चंद्रबुधगुरुशुक्रैः कंटकलग्नतुर्यसप्तमदशमस्थैः कोणगैः नवपंचमगैः सद्भिः त्र्यरिभवे तृतीयषष्ठैकादशस्थैः रविकुजमंदैः सद्भिः पुनः क्व नृयोगेषु जातको-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्तनृयोगेषु 'ओजर्क्षे पुरुषांशकेषु बलिभिलग्नार्कगुर्विंदुभैः पुंजन्म प्रवदेत् समांशकयुतैर्युग्मेषु तैर्योषितः। गुर्वर्कौ विषमे नरं शशिसितौ वक्रश्च युग्मे स्त्रियः' इत्यादिभिर्योगैः सामान्येन भौमगुरुरविवारे मृगपुनर्वसुपुष्यमूलहस्तश्रवणानामेकतमे नक्षत्रे विषमलग्ने गुरौ त्रिकोणोदयस्थे ऋतुमतीं गच्छेदिति तात्पर्यार्थः । इत्याधानम् १८॥

मूलेज्यादितिविष्णुसूर्यशशिभे सीमंतमंगाष्टके
मासे पुंसवनं त्रिपंचकमिते दक्षे तदीशे विधौ ॥
सद्दृष्टे कुजजीवभानुदिवसे पुंभागलग्ने खलैः
षष्ठत्र्यायगतैः शुभैः सुततपःकेंद्रेष्वरिष्फाष्टगैः १९॥

मूलेति । एषु योगेषु सीमंतकर्मसंस्कारः एषु केषु अंगाष्टके षष्ठेऽष्टमे मासि कुलाचाराद्वा । मूलं ईज्यं पुष्यं आदित्यं पुनर्वसुः विष्णुः श्रवणः सूर्यः हस्तं शशी मृगशिरः एषु नक्षत्रेषु त्रिपंचमिते मासेषु पुंसवनं रक्षाबंधनं कार्यं क सति तदीशे दक्षे सति तस्य मासस्य तृतीयपंचमषष्ठाष्टममासानां ईशे स्वामिनि दक्षे बलवत्तरे सति । मासेशास्तु जातके प्रोक्ताः । 'कललघनांकुरास्थिचर्मांगजं चेतनायाः सितकुजजीवसूर्यचंद्रार्किबुधाः । परतः उदयपचंद्रसूर्यनाथाः क्रमशो गदिताः शुभाशुभं च मासाधिपतेः सदृशम् ॥ ' एतेषामेकतमे बलिनि विधौ चंद्रे सद्दृष्टे शुभदृष्टे कुजजीवभानूनामेकतमवारे पुंभागलग्ने विषमलवे लग्नके वा विषमलग्ने खलैः पापैः षष्ठत्रीयलाभगैः शुभैः शोभनैः सुत ५ तप ९ केंद्रेषु १ । ४ । ७ । १० गतैः अरिष्फाष्टगैः शुभैः रिष्फं द्वादशं अष्टमं मृत्युभं तत्र गच्छंति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ते रिष्फाष्टगाः न रिष्फाष्टगैः पुंसवनसीमंते स्तः ॥ इति पुसवनसीमंते ॥ १९ ॥

अश्विन्यंत्यभयोर्मघोरगभयोर्मूलेंद्रयोः प्राक् परं
नाडीद्वंद्वमसद्गमोद्वहजनुःकालेषु गंडांतकम् ॥
मैत्रांत्यानिलभध्रुवेंदुषु रवीज्यारेषु सूताप्लवः
केंद्रे ज्ञेजसिते मृदुध्रुवचरे क्षिप्रेषु नामेष्टदम् ॥२०॥

अश्विनीति । गमोद्वहजनुःकालेषु गंडांतकं असत् तत् कियत्क भवति तदाह अश्विन्यंत्यभयोः अश्विनीरेवत्योः प्राक् परघटीद्वंद्वं अश्विन्यां प्राक् घटीद्वंद्वं रेवत्यामंत्यं घटीद्वयं एवं चतुर्घटिकात्मकं गंडांतं कालो भवति एवं मघायाः प्राक् घटीद्वयं उरगभमाश्लेषा तस्याः प्रांत्यं घटीद्वयं गंडांतकं भवति । मूलस्याद्यं घटीद्वयं इंद्रस्य ज्येष्ठायाः प्रांत्यं घटीद्वयं गंडांतं भवति एवं चतुर्घटिकात्मकं गंडांतं भवति । अन्यग्रंथे गंडांतं त्रिविधमुक्तम् । 'गंडांतं त्रिविधं प्रोक्तं नक्षत्रतिथिराशिजम् । नवपंचचतुर्थ्यंते ह्येकार्द्धघटिकामितम् ॥' अथ सूतायाः प्लवः स्नानं तत्क मैत्रांत्यानिलभध्रुवेंदुषु मैत्रमनुराधा अंत्यं रेवती अनिलं स्वातिः ध्रुवाणि रोहिण्युत्तराः इंदुः मृगशिरः एतेषु भेषु रवीज्यारेषु रविगुरुमंगलवारेषु ज्ञेज्यसिते बुधगुरुशुक्रे केंद्रे सति मृदुध्रुवचरक्षिप्रेषु भेषु मृगशिरश्चित्रांत्यमैत्ररोहिण्युत्तरास्वातिपुनर्वसुश्रवणधनिष्ठाशतभिषक्हस्तपुष्याश्विन्यभिजित्सु नामकर्म इष्टदं वांछितप्रदं भवति ॥ इति गंडांतसूतिकास्नाननामकरणानि ॥ २० ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पौष्णेज्याश्विकरद्वयध्रुवचरेष्वारार्किहीने दिने
दंताष्टादशषोडशार्कदशमे प्रेंखाधिरोहः शुभः ॥
तच्चक्रेऽथ चतुर्दिशं शरमितास्तारा नगा मध्यगा
सूर्यर्क्षाच्छुभमृत्युकार्श्यरुदनं दिक्ष्विष्टगा मध्यगाः २१

पौष्णेति । अस्मिन्योगे प्रेंखाधिरोहः शुभः पौष्णेज्याश्विकरद्वयध्रुवचरेषु भेषु भौमशनिवर्जिते वारे दंत ३२ अष्टादश १८ षोडश १६ अर्क १२ दशमे १० दिने तच्चक्र तस्याः प्रेंखायाश्चक्रे सूर्यर्क्षात् प्रतिदिशं पंच पंच भानि नगाः ७ मध्ये देयानि शीर्षप्रदेशे पंच शुभाः ताराः भानि दक्षिणे पंच मृत्युदाः पश्चिमे पंच कार्श्यकृतः सौम्ये पंच रुदनं कुर्वंति एताः चतुर्दिक्षु फलाः मध्यगाः नगाः इष्टदाः । इति प्रेंखारोहः ॥ २१ ॥

निष्क्रामस्त्रितुरीयमासि हरिभद्वंद्वे दितीज्येंदुभे
मैत्राश्व्यंत्यकरे चरोदयलवे भौमार्किरिक्तोज्झिते ॥
चित्रा पौष्णमृगेंद्रभे लघुचरे रिक्तारसूर्यार्कजान्
षष्ठीपक्षतिपर्वजन्मभादिनं त्यक्त्वा शुभं मुंडनम् २२॥

निष्क्राम इति । यः प्रेंखाधिरूढः तस्य वहिर्निष्क्रमणं भवति त्रितुरीयमासि तृतीये चतुर्थे मासि शिशोर्निष्क्रामः सूर्यावेक्षणं शुभम् हरिभद्वंद्वे श्रवणद्वये अदितिः पुनर्वसुः ईज्यं पुष्यं इंदुभं मृगशीर्षे मैत्रमनुराधा अश्वि अश्विभं अंत्यं रेवती करे हस्ते एषु भेषु च चारोदयलवे चरलग्ने मेषकर्कतुलामकराणामेकतमे लग्ने वा तदंशे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नवांशे किंलक्षणे भौमार्किरिक्तोज्झिते मंगलशनिवाररिक्तातिथिवर्जिते निष्क्रमणं कार्यमित्यर्थः। अथ चौलकर्माह।चित्रापौष्णमृगेंद्रभे लघुचरे मुंडनं चौलं शुभं रिक्ता तिथिः आरो भौमः सूर्यः प्रसिद्धः अर्कजो मंदस्तान् वारान् षष्ठीं पक्षांतिं प्रतिपदं पर्व पौर्णमासीदर्शौ जन्मभदिनं जन्मनक्षत्रं जन्मदिनं च त्यक्त्वा चौलकर्ममकार्यमिति। अथ क्षौरकर्म। 'त्वाष्ट्राश्विपौष्णमृगपुष्यकरेंद्रभं च चौलं चरेषु च बुधेंदुकवीज्यवारे। कुर्यात् क्षुरादिकशुभं प्रविहाय रिक्तां पक्षांतपर्वदिनमेव निशां च संध्याम् ॥ १ ॥ मैत्रोत्तराविधिभवह्निभपितृभेषु बाणा ५ ब्धि ४ नाग ८ रसवह्निमितांश्च घस्रान्। क्षौरी नरो भवति चेच्चतुराननेन तुल्यो न जीवति भृशं शरदं बलाढ्यः ॥ २ ॥ भानुर्मासि क्षपयति तथा सप्तमार्तंडसूनुर्भौमश्चाष्टौ वितरति शुभं बोधनः पंचमासान्। सप्तैवेंदौ दश सुरगुरौ शुक्र एकादशेति प्राहुर्गर्गप्रभृतिमुनयः क्षौरकार्येषु नूनम् ॥ ३ ॥ 'त्वाष्ट्रं चित्रा अश्वि अश्विनी पौष्णं रेवती मृगः मृगाशिरः पुष्यं कर हस्ते इंद्रः ज्येष्ठा चरेषु स्वातीपुनर्वसुश्रवणधनिष्ठाशतभिषजः तेषु चंद्रबुधगुरुशुक्रवारेषु क्षौरं कार्यम्। किं कृत्वा मैत्रोऽनुराधा विधिभं रोहिणी वह्निभं कृत्तिका पितृभे मघा एते नेष्टाः तान् त्यक्त्वा पक्षांतं प्रतिपत् पर्व अमावास्यापौर्णमास्यौ च परं रिक्तां विहाय रविकुजमंदान् त्यक्त्वा क्षौरं कार्यं ॥ इति निष्क्रमणचौले ॥ २२ ॥

पौष्णत्वाष्ट्रलघुध्रुवादितिहरिद्वंद्वैंदवे ज्ञे गुरौ शुक्रे
दर्शमथाष्टमीहरिदिनं त्यक्त्वा च नंदां जनैः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लग्नर्क्षाष्टममुज्झ्य केंद्रनवधरिंध्रांत्यसौम्येष्टषड्वर्जे-
दौ रसमासि नुः शरमिते स्त्रीणां सदन्नाशनम् ॥२३॥

पौष्णेति । एषु योगेषु अन्नाशनं बालानामन्नप्राशनं तत्तु पौष्णत्वाष्ट्रलघुध्रुवादितिहरिद्वैदवे रेवती चित्रा लघुभानि हस्तपुष्याश्विन्यभिजित् ध्रुवाणि रोहिण्युत्तरा अदितिः पुनर्वसुः हरिद्वैद्वं श्रवणद्वयं ऐंदवं मृगः एषां समाहारः तस्मिन् ज्ञे बुधवारे गुरौ जीवे शुक्रे त्रिषु वारेषु दर्श अमावास्या अष्टमी हरिदिनं द्वादशी नंदां प्रतिपत्षष्ठ्यैकादशीः त्यक्त्वा जनेः जन्मभदिनं जन्मकालस्य लग्नं ऋक्षं राशिस्ताभ्यामष्टमलग्नं उज्झ्य आसमंतादुज्झ्य केंद्रनवधीरंध्रांत्यसौम्ये सति प्रथमतुर्यसप्तमदशमनवमपंचमाष्टमद्वादशभवनेषु सौम्यग्रहयोगे अष्टमषष्ठरहिते विधौ षष्ठेऽष्टमे मासि नुः पुरुषस्य स्त्रीणां कन्यानां शरमिते पंचमे मासि प्रथमान्नप्राशनं सदिति । इत्यन्नप्राशनम् ॥ २३ ॥

मैत्रेज्यर्क्षमृगेऽत्यभश्रुतिकरद्वंद्वे पृथक् सद्गृहैस्त्र्या-
येंऽगे गुरुसंयुते खलखगैर्हीनेऽथ सौम्येऽयने ॥
आजेऽब्दे मधुपौषजन्मभदिनं मासं च हित्वा श्रवो-
वेधः सन्नथ दस्रपूषवसुभे भूषा करात्पंचके ॥ २४ ॥

मैत्रेति । अस्मिन्योगे श्रवोवेधः सन् कर्णवेधः शुभः । क्व मैत्रेज्यर्क्षमृगे अनुराधापुष्यमृगशीर्षे अंत्यभश्रुतिकरद्वंद्वे पृथगिति रेवत्योः द्वयं श्रुतिद्वयं करद्वयं सद्गृहैः त्र्याये तृतीयैकादशे सद्भिः अंगे लग्न-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुरुसंयुते खलखगैः पापग्रहैः हीने लग्ने सौम्येऽयने सौम्यायन ओजेऽब्दे विषमवर्षे मधुश्चैत्रः पौषः जन्मभदिनं मासं च एतानि त्यक्त्वा कर्णवेधः शुभः । अथ कर्णवेधे भूषा धार्या तत्राह । दस्रमश्विनी पूषभं रेवती वसुभं धनिष्ठा तत्र कराद्धस्तात्पंचके हस्तचित्रास्वातीविशाखाअनुराधासु भूषा कर्णवेधभूषा वलयादिलोकप्रसिद्धं चूडा इत्यादि धार्यम् । तत्र चक्रं वर्तते । इति कर्णवेधभूषे ॥२४॥

त्री ३ षु ५ त्र्य ३ क्षि २ नगा ७ क्षि २ चंद्र १ गुण ३ भू १ धिष्ण्यानि सूर्यर्क्षतः सूर्यासृग्भृगुराहुविच्छनिगुरुग्लौकेतुदैवानि च ॥ सौम्यर्क्षाणि शुभानि पाणिवलये कर्णत्रयेऽश्वानिले पित्र्ये भाग्यमृगेशभे द्विदयिते सौम्येष्विने कामठम् ॥ २५ ॥

त्रीष्विति । पाणिवलये शंखभूषणे सूर्यर्क्षतः सूर्यभात् त्रिपंचत्रिद्विसप्तद्व्येकत्र्येकधिष्ण्यानि सूर्यासृग्भृगुराहुविच्छनिगुरुग्लौकेतुदैवानि भवंति प्रथमं सूर्यस्य त्रीणि असृजो भौमस्य पंच भृगोस्त्रीणि राहोराक्षि द्वे विदो बुधस्य नगाः सप्त शनेरक्षिणी द्वे गुरोरेकं ग्लावश्चंद्रस्य त्रीणि केतोः भूरेकं एतानि धिष्ण्यानि वर्तंते तन्मध्ये सौम्यर्क्षाणि चंद्रबुधजीवशुक्रभानि भवंति च परं कर्णत्रये श्रवणत्रये अश्वाख्ये अश्विन्यां अनिले स्वातौ पित्र्ये मघायां भाग्ये पूर्वाफाल्गुन्यां मृगेशभे आर्द्रायां द्विदयिते विशाखायां सौम्येषु सौम्यवारेषु बुधगुरु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुक्रेषु इने रविवारे कामठं कमठपृष्ठजवलयानि धार्याणि । इति चूडाचक्रम् ॥ २५ ॥

हस्तादित्रितयेंऽत्यहर्यदितिभे द्वंद्वं पृथक् चंद्रभे
शुक्रेज्येंदुबले खलेंद्वितनुं षष्ठेंदुमंत्यारिगम् ॥
शुक्रं रंध्रखगान्विहाय धवले पक्षे द्वितीयाद्वये पंच
म्यां दशमीत्रये शुभलवे मौंजी तपःपंचके ॥ २६ ॥

हस्तादीति । एषु योगेषु मौंजी ब्राह्मणानां मखेलाबंधः श्रेष्ठः क्व-हस्तादित्रितये अंत्यहरिअदितिद्वंद्वे पृथक् पुनर्वसुपुष्ये रेवत्यश्विन्योः श्रवणधनिष्ठे तत्र चंद्रभे मृगशीर्षे शुक्रेज्येंदुबले गुरुशुक्रचंद्राणां गोचरबले तपःपंचके माघादिपंचमासेषु पुनः क्व धवले पक्षे शुक्लपक्षे द्वितीयाद्वये द्वितीयातृतीययोः पंचम्यां दशमीत्रये दशम्येकादशी-द्वादशीषु शुभलवे सौम्यलवे किं कृत्वा षष्ठेंदुखलेंद्वितनुं खलैः रविभौमशनिराहुभिरिंदुना च इतां प्राप्तां तनुं लग्नं विहाय अंत्यारिगं द्वादशरिपुभावे शुक्रं विहाय रंध्रखगान् अष्टमभावे सर्वं खगान् विहाय मौंजीयज्ञोपवीतकर्म कार्यम् । इति मौंजीकर्म ॥ २६ ॥

मूलेऽश्वे मृगपंचके त्रिषु शरात्कर्णे त्रिपूर्वासु वि-
च्छुक्रेज्यार्कदिने पुरादिनयुतानध्यायरिक्तोज्झिते ॥
अब्दे पंचमके शिशोरतिशुभो विद्योद्यमोऽर्थेंदवे
हौताशे तिसृषूत्तरासु च धनुर्विद्या न विद्या भवेत् २७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मूले इति । एषु योगेषु शिशोर्बालस्य विद्योद्यमो विद्यारंभः शुभः । एषु केषु मूलेऽश्वे अश्विन्यां मृगपंचके मृगार्द्रापुनर्वसुपुष्याश्लेषासु कराद्धस्तात्रये हस्तचित्रास्वातिषु कर्णे श्रवणे त्रिपूर्वासु तिसृषु पूर्वासु च एषु भेषु विच्छुक्रेज्यार्कदिनेषु बुधशुक्रगुरुरविवारेषु पंचमकेऽब्दे किंलक्षणे पुरादिनपूर्वे तिथियुता ये अनध्यायाः रिक्ताश्च तद्रहिते अष्टमीनवमीत्रयोदशीचतुर्दश्यमापूर्णिमाप्रतिपच्चतुर्थ्यो निषिद्धाः । 'त्रयोदशीचतुष्कं च सप्तम्यादिदिनत्रयम् । चतुर्थी च तथा त्याज्या अष्टावेते गलग्रहाः ॥' अथ ऐंदवे मृगे हौताशे कृत्तिकायां तिसृषु उत्तरासु धनुर्विद्या न श्रेष्ठा भवेत् । इति विद्यारंभः ॥ २७ ॥

पौष्णेऽश्वे करपंचके च वसुभे चैलं बुधादित्रये
पुंसां पुष्यपुनर्वसुस्थिरयुते स्याच्छोभनं सत्तिथौ ॥
तच्चक्रे नवधा सुरासुरनराः कोणेषु मध्ये दशा-
पाशे स्युः शुभनेष्टशोभनफलं पंकांजनांकादिकम् २८

पौष्णे इति । एषु योगेषु चैलं वस्त्रधारणं शोभनं पौष्णे रेवत्यां अश्वे अश्विन्यां करपंचके हस्तादिपंचके हस्तचित्रास्वातीविशाखानुराधाः च परं वसुभे धनिष्ठायां बुधादित्रये बुधगुरुभृगुवारे रिक्तावर्जिततिथौ पुंसां पुरुषाणां पुष्यपुनर्वसुस्थिरयुते रोहिण्युत्तरात्रये वस्त्रधारणं सत् । तच्चक्रे तद्वस्त्रस्य चक्रे नवधा नवभिर्भागे कृते कोणेषु चतुष्कोणेषु मध्यत्रिकोष्ठेषु दशापाशे कोष्ठद्वये सुरासुरनरा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वसंति, चतुष्कोणे सुरा वसंति, मध्यकोष्ठत्रये असुरा वसंति, दशापाशे प्रांते शेषविभागे कोष्ठे नरा वसंति, तत्र पंकांजनादिकं पंकस्य वांजनस्य प्रथमं धारणात् अंकादिकं चिह्नादिकं भवति आदिशब्देन दग्धे फाटिते शुभनेष्टशोभनफलं ज्ञेयं देवांशे शुभं रक्षांशे नेष्टं मनुष्यांशे शोभनफलम् । अत्र स्त्रीणां वस्त्रसाहचर्यात् भूषणाद्यपि धारयेत् । तथा चोक्तम् । 'करादिपंचकेऽश्विभे सषौष्णवासवे स्मृता । धृतिश्च शंखकांचनप्रवालरक्तवाससाम् ॥' सज्जनवल्लभे । 'नासत्यपौष्णवसुभे करपंचकेषु मार्तंडभौमगुरुदानवमंत्रिवारैः । मुक्ताप्रवर्णमणिविद्रुमशंखदंतरक्तांवराणि विधृतानि भवंति सिद्ध्यै॥' इति वस्त्रम् ॥ २८ ॥

उद्वाहे वसुभागधेयकरणेऽग्न्याधानमिंद्राग्निभे
शाक्राग्नेयमृगध्रुवांत्यगुरुभे लग्ने जलर्क्षोज्झिते ॥
चंद्रे कोणचतुष्टयोपचयगैरार्कारजीवेंदुभिः
शेषैश्चोपचयस्थितैरमृतिगैः खैटैः शुभाप्त्यै भवेत् २९

उद्वाह इति । उद्वाहे विवाहकाले वसुभागधेयकरणेऽपि वसु धनं तस्य विभागकरणकालेऽपि अग्न्याधानं कर्तव्यं क इंद्राग्निभे विशाखायां शाक्रं ज्येष्ठा आग्नेयं कृत्तिका मृगः ध्रुवाणि रोहिण्युत्तरात्रयं अंत्यं रेवती गुरुभे पुष्ये लग्ने जलर्क्षोज्झिते मीनकर्कमकरेभ्योऽन्यलग्ने चंद्रे जलराशिरहित कोणं त्रिकोणं ५ । ९ चतुष्टयानि १ । ४ । ७ । १० कंटककेंद्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखमानां उपचयानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षष्ठलाभतृतीयभानि एतेषु अर्कारजीवेंदुभिः सद्भिः शेषः शेषग्रहैः बुधशुक्रशनिभिः उपचयस्थितैः सर्वैः अमृतिगैः अष्टमभावरहितैः अग्न्याधानं शुभास्यै । भवेत् इत्यग्न्याधानम् ॥ २९ ॥

ज्येष्ठायां हरिभे मृदुध्रुवलघुष्वोजस्विभिः पाकपः
क्ष्माजार्कोदयजन्मपैः स्थिरतनौ शीर्षोदये सद्युते ॥
रिक्तां प्रोज्झ्य जनुग्रहादुपचये लग्ने त्रिषष्ठायगैः
पापैरंत्यषडष्टवर्जितशुभैर्भूपाभिषेकः शुभः ॥ ३० ॥

ज्येष्ठायामिति । एषु योगेषु भूपाभिषेकः क्व ज्येष्ठायां हरिभे श्रवणे मृदूनि मृगचित्रारेवतीमैत्राणि ध्रुवाणि रोहिण्युत्तरर्क्षाणि लघूनि हस्तपुष्याश्विन्यभिजित् तेषु पाकपः तत्कालिकदशानाथः क्ष्माजो भौमः अर्को रविः उदयजन्मपैरिति जन्मलग्नेशो जन्मराशीशः एभिः सर्वैः ओजस्विभिः बलिष्ठैः शुभस्थानस्थैर्वा स्वोच्चसुहृत्स्वत्रिकोणस्वनवांशस्थैः वा तेजस्विभिः उदितैः स्थिरतनौ स्थिरलग्ने वृषसिंहकुंभानामेकतमे वा शीर्षोदये लग्ने । युग्मस्त्रीसिंहकुंभालितुलाशीर्षोदयाः स्मृताः । एतेषामेकतमे लग्ने सद्युते शुभग्रहयुते अत्र सद्दिने इति पाठे सोमबुधगुरुभृगुवारेषु परं रत्नमालायां शनिवारोऽप्युक्तोऽस्ति तेन भौमार्कवारौ निषिद्धौ अन्ये वाराः शुभाः रिक्तां प्रोज्झ्य जनुग्रहाज्जन्मलग्नात् वा जन्मराशेरुपचये ३ । ६ । १० । ११ लग्ने त्रिषष्ठायगैः पापग्रहैः अंत्यषडष्टवर्जितशुभैः शुभग्रहैः द्वादशषष्ठाष्टमरहितैः भूपस्याभिषेकः शुभ इति तात्पर्यार्थः । इति राजाभिषेकः ॥ ३० ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्व्यादित्ये ध्रुवभेऽत्यभे द्विदयिते त्वाष्ट्रद्वये वारुणे
मैत्राश्वे रविजीवभार्गवदिने चंद्रे शुभैर्वीक्षिते ॥
कुंतासिच्छुरिकाधनुःशरतनुत्राणानि कंटारिका
भूपालैरिति हेतयो विधुबले धार्या जयाप्तीच्छुभिः ३१

द्व्यादित्ये इति । भूपालैः राजभिः इति एतावन्मात्राः हेतयः आयुधानि एषु योगेषु धार्याः । किंलक्षणैः भूपालैः जयाप्तीच्छुभिः जयकांक्षिभिः द्व्यादित्ये पुनर्वसुद्वये ध्रुवेषु अंत्ये रेवत्यां द्विदयिते विशाखायां त्वाष्ट्रद्वये चित्राद्वये वारुणे शतभिषे मैत्राश्वे अनुराधाश्विन्यौ एषु भेषु रविजीवभार्गवदिने वारेषु चंद्रे शुभैर्वीक्षिते चंद्रे शुभे शुभग्रहैर्वा ईक्षिते विधुबले चंद्रबले सति कुंतः भल्लः असिः खड्गः छुरिका धनुः धनुष्यं शरः बाणः तनुत्राणं कवचं इति हेतयो धार्याः । इत्यस्त्रधारणम् ॥ ३१ ॥

हस्तेंदुश्रवणाश्विपुष्यवसुभेष्वादित्यमैत्रांत्यभे
सद्यानं त्रिकुबाणपर्वतमितास्ताराश्च शाक्रद्वयम् ॥
मंदेंदू श्रुतिषट्कमीज्यममरेज्यर्क्षं कभं पूर्वतः
शुक्राकौं ज्ञकुजार्यमद्वयमथार्काराकिंरिक्तास्त्यजेत् ॥ ३२ ॥

हस्तेति । एषु योगेषु यानं गमनं सत् हस्तेंदुश्रवणाश्विपुष्यवसुभेषु आदित्यमैत्रांत्यभे आदित्यं पुनर्वसुः मैत्रमनुराधा अंत्यभे रेवत्यां त्रिकुबाणपर्वतमितस्तारास्त्यजेत् च परं पूर्वतः प्राचीदिक्तः शाक्रद्वये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्येष्ठामूले मंदेंदुवारौ शनिसोमौ प्राच्यां त्यजेत्। श्रुतिषट्कं श्रवणादिषट्कं गुरुवारं याम्ये त्यजेत्। अमरेज्यर्क्षं पुष्यं कर्म रोहिणी शुक्रार्कौ पश्चिमे त्यजेत्। ज्ञो बुधः कुजो भौमः अर्यमद्वयम् उत्तराफल्गुनीहस्तौ उदक् त्यजेत्। अथ अर्काकिरिक्ताः रविभौमशनिरिक्तास्तिथयः त्यजेत्। तथा चोक्तम् 'तिथ्यश्चतुर्थीं नवमीं चतुर्दशीं विहाय विष्टिं करणं च गच्छतः। भवंति चामीकरवाजिवारणा रथाश्च मुख्या धनवामिवारणाः॥' अन्यच्च नक्षत्रेषु 'परित्यजेत्त्वाष्ट्रयमोरगाणामर्धं द्वितीयं गमने जयेप्सुः। पूर्वार्धमाग्नेयमयाद्विदैवं स्वाती मतेनोशनसः समस्तम्॥' सौम्यवारे शुभा यात्रेति॥ इति यात्राप्रकरणम्॥ ३२॥

विप्रा गोफलपुष्पदुग्धमणयो वेश्या दधीभो हयश्छत्रादर्शमधुज्वलच्छिखिसुरामांसास्त्रकन्यामृगाः॥
बभ्रुश्चापमयूरपूरितघटाः पुत्रान्विता स्त्री सुवाग्
वाद्यं चामरधौतवस्त्ररजका दृष्टा गमे स्युः शुभाः॥३३॥

अथ शकुनान्याह विप्रा इति। एते पदार्थाः गमे दृष्टाः शुभाः स्युः एते के विप्राः एकाधिका द्विजाः गावः फलं पुष्पं दुग्धं मणिः स्फटिकादिवज्रांतः वेश्या सामान्यवनिता दधि इभो गजः हयोऽश्वः छत्रमातपत्रं आदर्शो दर्पणः मधु क्षौद्रं ज्वलच्छिखी ज्वलमानो वह्निः सुरा मद्यं मांसं अपक्वामिषं अस्त्रं खड्गभल्लखेटकादि कन्या मृगः एणः बभ्रुनकुलः चाषो नीलपक्षी मयूरः शिखंडी पूर्णघटाः पुत्रयुक्ता स्त्री सुवाक् शोभनाशीःप्रयुक्ता वाणी वाद्यं चतुर्विधं।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

' ततं वीणादिकं प्रोक्तं सन्नद्धं मुरजादिकम् । घनं तालादिकं ज्ञेयं सुषिरं वंशपूर्वकम् ॥ ' इति एषां ते मध्योदकतमं वाद्यम् । चामरं वायुव्यजनं धौतानि वस्त्राणि यत्पार्श्वे एवंविधो रजकः एते पदार्थाः अन्यच्च सुवाक् वेदध्वनिरपि ग्राह्यः वाद्यध्वनिरपि तथा मृदंगादिघोषः श्रेष्ठः दर्शनं नकुलचाषमयूराणामपि श्रेष्ठं छागो भरद्वाजः पक्षी दृष्टः शुभः ॥ ३३ ॥

काष्ठं चर्म तृणाहितूललवणास्थ्यंगारतैलं गुडो
वंध्यारिः कलिमुक्तकेशवसनोऽभ्यक्तौषधिः क्लीबविट् ॥
तक्रं पंकवसार्द्रवस्त्रजटिलश्यामान्नमुंडक्षुतं
प्रावृड्दीनसुमत्तवांतविगलन्दुष्टोक्तयो नो शुभाः॥ ३४॥

काष्ठमिति । एते पदार्थाः गमे गमने दृष्टाः नो शुभाः एते क काष्ठं इंधनादि चर्म उपानदादि तृणं घासादि अहिः सर्पः तूलं कार्पासादि लवणं पंचविधं लवणं काललवणं सैंधवं सौवर्चलं सामुद्रकं यद्यप्यौषधमध्ये एतेषामंतर्भावः तथापि जवक्षारसाजिक्षारावौषधमध्ये ग्राह्यौ अस्थिदंतादि अंगारः शांताग्निकाष्ठेऽगारः तैलं सर्वमपि वंध्या वनिता अप्रसूता स्त्री अभ्यक्तो नरः तैलाभ्यक्तः औषधं चूर्णगुटिकादि क्लीबः षंढः विट् पुरीषं तक्रं पंकः कर्दमः वसा पशूनां चर्मांत्रादि आर्द्रं वस्त्रं यस्य सः आर्द्रवस्त्रः जटिलो जटावान् श्यामान्नं माषमुद्गतिलादि मुंडः क्षपणकः क्षुतं क्वचित् छिक्का प्रावृट् संन्यासी दीनः सुमत्तः क्षीबः वांतो वमनविगलन् पतन् दुष्टोक्तयो मा याहि क्व यास्यसीति नो शुभाः । इत्यपशकुनाः ॥ ३४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मासे फाल्गुनमार्गमाधवनभःपौषे ध्रुवेंद्वीज्यभे
हस्तस्वातिवसुद्वये शनिभृगुज्ञेज्ये गृहारंभणम् ॥
द्वारं प्राक्तिमिमेषकौर्पिषु शुभे याम्य नृयुग्मांगना-
नक्रे पश्चिममुक्षतौलिकलशे कर्कार्श्विसिंहे उदक् ॥३५॥

मासे इति । एतेषु योगेषु गृहारंभणं वास्तुप्रारंभणं कर्तव्यं क फाल्गुनमार्गमाधवनभःपौषे फाल्गुनः प्रसिद्धः मार्गो मार्गशीर्षः माधवो वैशाखः नभः श्रावणः पौषः प्रसिद्धः एतेष्वेव मासेषु गृहारंभः तदुक्तं वास्तुशास्त्रे । 'चैत्रे शोककरं गृहादिरचनं स्यान्माधवेऽर्थप्रदं ज्येष्ठे मृत्युकरं शुचौ पशुहरं तद्वृद्धिदं श्रावणे । शून्यं भाद्रपदेऽश्विने कालिकरं भृत्यक्षयं कार्तिके धान्यं मार्गसहस्ययोर्दहनभीर्माघे श्रियः फाल्गुने ॥' ध्रुवेषु रोहिण्युत्तरासु इंदौ मृगे ईज्यभे पुष्ये हस्तस्वातिवसुद्वये धनिष्ठाशतभिषे शनिभृगुज्ञेज्ये वारे मंदशुक्रबुधगुरुवारेषु गृहारंभणं कार्यं तिमिमेषकौर्पिषु राशिषु सत्सु मीनमेषवृश्चिकेषु एतेषां राशीनां प्राग्द्वारं गृहं सत्, नृयुग्ममिथुनेंऽगना कन्या नक्रे मकरे एतेषां याम्यद्वारं गृहं सत्, उक्षतौलिकलशे वृषतुलाकुंभे पश्चिमद्वारं सत्, कर्के अश्विधनुषि सिंहे उदग्द्वारं गृहं सत् ॥ ३५ ॥

सिंहात्रित्रिरिहालये हरदिशः कोणेषु सव्यं भ्रमे-
च्छेषस्याननपृष्ठपुच्छमपरं शून्यं च खाते शुभम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मीनाद्देवगृहेऽपसव्यमृषभाद्वेद्या च चापादगुः
सव्यं पूर्वदिशः क्रमेण तमसि द्वारं न सत्सन्मुखे ३६

सिंहादिति । इहालये गृहे सत् सिंहात् त्रिषु तिसृषु संक्रांतिषु हरिदिशः ईशानकोणतः सव्यं सव्येन शेषस्य शेषनागस्याननं पृष्ठं पुच्छं भ्रमेत् अपरं शून्यं तच्छून्यादिशि खातं शुभं सिंहकन्यातुलासंक्रांतिषु शेषस्येशानकोणे मुखे आग्नेय्यां पृष्ठं नैर्ऋतौ पुच्छं वायव्ये शून्यं तत्र खातं कर्तव्यं एवं वृश्चिकादिषु तिसृषु संक्रांतिषु वह्निकोणे मुखं नैर्ऋतिकोणे पृष्ठं वायव्ये पुच्छं ईशाने खातः एवं कुंभादितिसृषु नैर्ऋतौ मुखं वायव्ये पृष्ठं ईशाने पुच्छं आग्नेय्यां खातः एवं देवगृहे मीनात्रयं त्रयं गणनीयं जलाशये मकरादेवमेव गणनीयम् । तथा च मुहूर्तचिंतामणौ ' देवालये गेहविधौ जलाशये शेषाननं शंभुदिशः क्रमेण । मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात्पृष्ठविदिक्षु भावयेत् ॥ ' दैवज्ञवल्लभेऽपि ' ऐंद्र्यां शिरो भाद्रपदात्रये च याम्ये तु मार्गात्रितयेऽहिवक्त्रम् । तपस्यमासात्रिषु पश्चिमायां ज्येष्ठादिमासात्रितयेऽप्युदक् स्यात् ॥ ' इति यत्कन्यादिगणना कृता तद्वास्तुशास्त्रोक्ता । ' प्राच्यां नागमुखं बुधैर्निगदितं भाद्राश्विने कार्तिके मार्गात्फाल्गुनशुक्रतस्त्रिषु मुखं याम्ये जले चोत्तरे । क्षेत्रेऽष्टाष्टविभाजिते दिनकराद्वाराल्लिखेत्कोष्ठकाः शन्यंगारकयोश्च तत्र फणिनः शारीरतं नो खनेत् ॥ ' इति राजवल्लभोक्तं । ' पूर्वास्ये निखखातकं यमदिशास्ये खातमीशानके आग्नेय्यां खननं च पश्चिमदिशावक्त्रे तथैवोत्तरे । वक्त्रे नैर्ऋतिकोणके च खननं वा शंकु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्थापनम्' इत्युक्तिवशात् परं च भाद्रपदः श्रावणः पूर्णिमातस्तदा तु सिंहसंक्रांतिसंभवात् रामदैवज्ञादिभिर्मुहूर्त्तचिंतामणौ सिंहादितो गणनाकृतः अथ वृषभात वृषभराशितोऽपसव्यं वामभ्रमेण गणनावेद्यां विवाहवेद्यां मंडपवेद्यां वा श्रौताधानवेद्यां खननमुक्तम् । अन्यच्च । 'वृषाद्वेद्यां गृहे सिंहात्रिकं मीनात्सुरालये । सृष्ट्या संचरते नागो वेदीरुद्रालयं विना ॥' अत्र खाते वहवो भ्रमंति वलनं च कुर्वंति राजवल्लभोक्तं चतुःषष्टिकोष्ठगतं भौमशनिगतफणिनः

र	चं	मं	बु	गु	शु	श	र
चं	मं	बु	गु	शु	श	र	चं
मं	बु	गु	शु	श	र	च	मं
बु	गु	शु	श	र	चं	मं	बु
गु	शु	श	र	चं	मं	बु	गु
शु	श	र	चं	मं	बु	गु	शु
श	र	चं	मं	बु	गु	शु	श
र	चं	मं	बु	गु	शु	श	र

इशाने ५।६।७		अग्नी ८।९। १०
	गृह खात	
वायव्य २।३।४		नैर्ऋत ११। १२।१

ईशाने २।३।४		अग्नी ११। १२।१
	वेद्यां तत्खात	
वायव्य ५।६।७		नैर्ऋत ८।९ १०

ईशाने १२।१ २		अग्नी ३।४।५
	देवा लय	
वायव्य ९।१० ११		नैर्ऋत ६।७।८

ईशाने १०।११ १२		अग्नी १।२।३
	जला शय	
वायव्य ७।८।९		नैर्ऋत्य ४।५।६

	पूर्व ९।१० ११	
उत्तर ६।७।८	राहु दिशा	दक्षिण १२।१ २
	पश्चिम ३।४।	

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शरीरे नो खनेत् अत्र सिंहादित्रये पूर्वमुखे नागे वायव्ये शून्यमा-
याति उत्तराभिमुखे नैर्ऋतिकोणे शून्यमायाति इत्यलं चापधन्व-
कात्रयेऽप्यगुः राहुः पूर्वदिशः सकाशात् क्रमेण भ्रमति तमसि राहौ
सन्मुखं द्वारं न सत् । इति गृहारंभः ॥ ३६ ॥

याम्योदक्प्रथमालितौलिवृषभे द्वारं सतीने शुभं
प्राक्पश्चाद्घटसिंहकर्किमकरेऽथो वास्तुकुंभेर्कभात् ॥
षष्ठादष्टसु भेषु सद्गृहमथो द्वाविंशतेः षट्शुभाः
सत्खेटे दशमस्थिते स्थिरगृहं द्व्यंगोदये सद्युते ॥ ३७ ॥

याम्योदगिति । प्रथमालितौलिवृषभे प्रथमो मेषः अलिर्वृश्चिकः
तौलिः तुला वृषश्च एषां समाहारः तत्र राशिषु इने सूर्ये गते सति
याम्योदक्द्वारं शुभं घटसिंहकर्किमकरे इने गते सति प्राक् पश्चाद्द्वारं
गृहं शुभम् । एतेन वत्सः कथितः वत्सः पूर्वादिषु दिक्षु कन्यादितस्त्रये
त्रये वत्सो वसति गृहेषु सन्मुखपृष्ठतो न सत् उक्तं च 'अग्रतो हरते
आयुः पृष्ठतो हरते धनम् । वामदक्षिणयोर्वत्से गृहद्वारं सुशोभनम् ॥'
अथो वास्तुकुंभे वास्तुकलशे अर्कभात् षष्ठात् धिष्ण्यात् अष्टसु भेषु
गृहप्रवेशः । अथो अथवा द्वाविंशतितः नक्षत्रात्षट्सु प्रवेशः शुभः
सत् 'खेटे शुभग्रहे दशमस्थिते स्थिरराशिलग्ने द्व्यंगोदये द्विस्वभावलग्ने
सद्युते शुभग्रहयुते लग्ने सति गृहारंभः कार्यः ॥ ३७ ॥

द्वाश्वक्रं रविभाद्युग४द्विर२जलधि४द्व्यर२ब्धि४द्वि
२वेद४द्व्यंर२शेषं शीर्षभुजोर्ध्वकोणगणनान्मध्यो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्ध्वपार्श्वद्वयम् ॥ सत्कोणाधरगेन चाथ चरभांशा-
र्कारतिक्ताकुहूं वामेऽर्केऽथ मृदुध्रुवेज्यहरिभे द्वंद्वे
च वासोऽनिले ॥ ३८ ॥

द्वाश्चक्रमिति । रविभाद्वाश्चक्रं शीर्षभुजोर्ध्वमस्तकस्वशाखोर्ध्वको-
णशाखाकोणगणनात् युगद्विजलधिद्व्यब्धिद्विवेदद्वयं शेषं लिखेत्
तत्र मध्योर्ध्वपार्श्वद्वये सत् कोणेषु अधरगतकोणेषु चेद्वं द्वारस्था-
पनसमये समायाति तदोर्ध्वं संभवेत् अथो देहल्यां धनहानिः स्यात्
अथ चरभांशार्कारिक्ताः कुहूममावास्यां त्यक्त्वा वामेऽर्के साति अत्र
गृहे वासः कर्तव्यः क्व मृदुध्रुवेज्यहरिभद्वंद्वेऽनिले मृदूनि चित्रारेव-
त्यनुराधाः ध्रुवाणि रोहिण्युत्तराणि ईज्यं पुष्यं हरिभद्वंद्वं श्रवण-
धनिष्ठे अनिले स्वातौ वामार्कस्तु बहुप्रोक्तः एकप्रकारस्तु कार्शा-
नवात्सप्तसप्तनक्षत्राणि चतुर्दिक्षु लिखेत् तत्र धिष्ण्ये रविर्भवेत् ।
द्वितीयप्रकारस्तु । 'दग्धा दिगुक्ता रविणा प्रभुक्ता यस्यां रवियास्यति
धूमिता सा । दीप्तार्कयुक्ता रजनीभवांत्ययामार्धतो याममिता
गतिः स्यात् ॥' तृतीयप्रकारस्तु लग्नकुंडलिकायां लग्नाद्वितीयद्वादशेषु
यो ग्रहः स पूर्वगः एकादशदशमनवमेषु दक्षिणगः अष्टमसप्तमषष्ठेषु
पश्चिमगः पंचमचतुर्थतृतीयेषूत्तरगः एवं क्रमेण रविमानयंति ॥ इति
गृहप्रवेशः ॥ ३८ ॥

द्वीशे मूललघुध्रुवे मृदुचरे पैत्र्ये हलारंभणं त्यक्त्वा
मंदकुजौ हरिद्युसहितां रिक्तां च पर्वाष्टमीम् ॥ तच्चक्रे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रविभुक्तभाद्गणनया त्री ३ षु ५ त्रि ३ बाण ५ त्रयं ३ त्री ३ ष्वृ ५ क्षेष्वशुभं शुभं फलमिहाशाशूलपूर्वं त्यजेत् ॥ ३९ ॥

द्वीशे इति । द्वीशे मूललघुध्रुवे मृदुचरे पैत्र्ये हलारंभणं के ते द्वीशे विशाखायां मूलं प्रसिद्धं हस्तपुष्याश्व्यभिजित् ध्रुवाणि रोहिण्युत्तरात्रयाणि मृदूनि चित्रारेवत्यनुराधाः चरभानि स्वाति-पुनर्वसुश्रवणधनिष्ठाः पैत्र्यं मघा एतेषु ऋक्षेषु हलारंभणं हलप्रवहणं कार्यं मंदकुजौ वारौ द्वादशीसहितां रिक्तां पर्वणी पूर्णिमामा स्यौ अष्टमीं च त्यक्त्वा अथ तच्चक्रे हलचक्रे रवेः सूर्यस्य भुक्तभात् गणना कार्या त्रि त्रीणि इषवः पंच त्रि त्रीणि बाणाः पंच त्रयं त्रीणि त्रीषु त्रीणि पंच ऋक्षेषु नक्षत्रेषु फलं शुभमशुभं ज्ञेयम् । इह गमने आशाशूलपूर्वं दिक्शूलं वारशूलं त्यजेत् ॥ इति हलारंभः ॥ ३९ ॥

मैत्रांत्ये वसुभे करत्रयमघामूलाश्विचांद्रे ध्रुवे पुष्ये सत्खलु बीजवापनमहेश्चक्रे रवेर्भुक्तभात् ॥ त्रिस्त्रिर्मूर्ध्नि गले न शोभनफले तुंदेऽर्कताराः शुभाः पुच्छेऽन्यत्र चतुष्कपंचक इमे बीजोप्तिकाले खले ॥ ४० ॥

मैत्रेति । एषु योगेषु बीजवापनं सत् केषु मैत्रे अनुराधायां अंत्ये रेवत्यां वसुभे धनिष्ठायां करत्रये हस्तचित्रास्वातौ मघायां मूले अश्विन्यां चांद्रे मृगे ध्रुवे रोहिण्युत्तरासु पुष्ये अहेश्चक्रे सर्पाकारचक्रे रवेर्भुक्तभात् त्रिस्त्रिर्मूर्ध्नि त्रीणि गले शोभनफले न तुंदे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जठरे अर्कतारा द्वादश धिष्ण्यानि शुभाः पुच्छेऽन्यत्र चतुष्कपंचके पुच्छे चतुष्कं अन्यत्र बाहिः पंचकं इमे बीजोप्तिकाले खले दुष्टफले भवतः ॥ इति बीजोप्तिः ॥ ४० ॥

पौष्णेऽश्वेऽदितिभद्वये च शशिभे हस्ताच्च कर्णात्रये
मैत्रे कोणपभे सदौषधमथ त्यक्त्वा च रिक्तार्कजान् ॥
तत्स्नानं चरभांगयोरिनकुजे रिक्तासु कृष्णे दले
शुक्रेंदुध्रुवसार्पपौष्णपितृभादित्यानिलर्क्षं त्यजेत्४१॥

पौष्णे इति । एषु योगेषु औषधं सत् एषु केषु पौष्णे रेवत्यां अश्वे अश्विन्यां अदितिभद्वये पुनर्वसुपुष्ये शशिभे मृगे हस्तात्रये हस्तचित्रास्वातौ कर्णात्रये श्रवणधनिष्ठाशतभिषक् मैत्रे अनुराधायां कोणपभे मूले किं कृत्वा रिक्तार्कजान् त्यक्त्वा औषधं सद्भवति इति शेषः । तस्य रोगिणः स्नानं चरभांगयोः चरभेषु स्वात्यादित्यहस्त्रिये चरलग्ने मेषकर्कतुलामकरेषु इनकुजे सूर्यभौमवारे रिक्तासु तिथिषु कृष्णदले कृष्णपक्षे अत्रापि शुभचंद्रे । रत्नमालायां यदुक्तम् 'रिक्तातिथौ चंद्रबले विहीने' इत्यत्र चंद्रबले स्वकीये नैसर्गिकबले क्षीणचंद्र इत्यर्थः । तत्र शुक्रवारं चंद्रवारं ध्रुवभानि सार्पमाश्लेषा पौष्णं रेवतीं पितृभं मघां आदित्यं पुनर्वसुं अनिलर्क्षं स्वातीं त्यजेत् ॥ इत्यौषधरोगिस्नानम् ॥ ४१ ॥

घोरा क्रूरखौ लघूडुशशिनि ध्वांक्षी महोदर्यथो
क्षोणीजे चरभे मृदुज्ञदिवसे मंदाकिनीज्ये ध्रुवे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मंदा मिश्रासिते च मिश्रकथनात्तीक्ष्णार्कजे राक्षसी
श्रेष्ठा शूद्रकवैश्यचौरनृपविट्पश्वंत्यजानां क्रमात् ४२

घोरेति । क्रूरेषु रविवारे या संक्रांतिः सा घोरा भवति, लघूडुषु शशिनि ध्वांक्षी भवति, क्षोणिजे भौमवारे च भेषु या संक्रांतिः सा महोदरी भवति, मृदुभेषु ज्ञदिवसे या संक्रांतिः सा मंदाकिनी भवति, इज्ये गुरुध्रुवभेषु या संक्रांतिः सा मंदा भवति, मिश्रभे सिते या संक्रांतिः सा मिश्रा भवति, तीक्ष्णभेषु शनिवारे या संक्रांतिः सा राक्षसीनाम्नी भवति । एवमत्र युगपद्वारभयोगे संपूर्णनामद्वयोः अन्यथा त्वेकवारवशाद्भिन्ननाम तदा नामद्वयं भवति क्रमेण सप्तापि संक्रांतयः शूद्रवैश्यचौरक्षत्रियद्विजपशुम्लेच्छानां सा शुभा भवति, घोरा शूद्रान् सुखयति, ध्वांक्षी वैश्यान् सुखयति, महोदरी चौरान् सुखयति, मन्दाकिनी नृपान् सुखयति, मन्दा द्विजान् सुखयति, मिश्रा पशून्सुखयति, राक्षस्यंत्यजान् सुखयति ॥ ४२ ॥

द्व्यंगर्क्षे षडशीतिवक्रमयनं सौम्यं मृगे चोत्तरा
नाड्यः षोडश पुण्यदाश्च विषुवन्मेषे तथा तौलिनि ॥
मध्याः पुण्यतमाः स्थिरे हरिपदं याम्यायनं कर्कटे
पूर्वाः पुण्यतमाश्च तत्र तिलयुग्धान्यं घृतं चार्पयेत् ४३

द्व्यंगर्क्षे इति । द्व्यंगर्क्षे द्विस्वभावराशौ या संक्रांतिः तस्याः षडशीतिवक्रं द्विस्वभावराशयो मिथुनकन्याधनुर्मीनाः एताः षडशीतिमुखाभिधाः मृगे मकरे या संक्रांतिः तत्सौम्यायनं भवति अत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पंचसंक्रांतिषु उत्तराः संक्रांतिकालात्पराः षोडश नाड्यो घटिकाः पुण्यदाः इदं साधारणेन कथितम् 'पूर्वतोऽपि परतोऽपि संक्रमात्पुण्यकालघटिकास्तु षोडश।' इति वचनात् अन्यथा अनयोर्विशेष उक्तः। ब्रह्मवैवर्तादौ। 'अतीतानागते पुण्ये द्वे उदग्दक्षिणायने। त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः॥' इति मकरे चत्वारिंशत् घटिका उक्ताः। मेषे तथा तौलिनि तुलायां संक्रांतिषु विषुवत्यां तत्र मध्याः पुण्यतमाः विशेषवचनात् 'दश प्रोक्ता वर्तते वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश' इति वचनात् स्थिरे स्थिरराशौ वृषसिंहवृश्चिककुंभसंक्रांतिषु हरिपदं भवति। कर्कटे याम्यायनं भवति। तत्र पूर्वाः संक्रांतितः प्राक् त्रिंशन्नाड्यः पुण्यदाः तत्र संक्रमकाले तिलान् धान्यं घृतं अर्पयेत्। तथा चोक्तम्। 'संक्रांतौ यानि दानानि हव्यकव्यानि भारत। तानि तान्युपतिष्ठंति पितॄणामक्षयाय च॥' इति व्यासः। इति संक्रांतिः॥ ४३॥

द्व्यादित्येश्वकरत्रये च करिणां कर्माथ पौष्णद्वये
स्वातीज्यादितिभे करे मृगवसुद्वंद्वे तथा वाजिनाम्॥
शाक्रेऽर्के वसुभद्वयेऽदितियुगे द्वीशाश्विपौष्णे गवां
नो कर्णध्रुवपर्वपक्षकदले त्वाष्ट्रे च रिक्तार्कयोः॥४४॥

द्व्यादित्येति। एषु योगेषु करिणां हस्तिनां कर्म आरोहणानयनशिक्षादिकर्म कर्तव्यं केषु आदित्याद्दिः द्व्यादित्यं पुनर्वसुपुष्ये तत्र अश्विकरत्रये अश्विन्यां हस्तात्रये हस्तचित्रास्वातौ करिणां हस्तिनां कर्म कुर्यात्। अथ पौष्णद्वये रेवत्यश्विन्योः स्वातौ ईज्ये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुष्ये अदितिभे पुनर्वसौ करे हस्ते मृगे मृगशीर्षे वसुद्वंद्वे धनिष्ठा-शतर्क्षयोः वाजिनां कर्म कुर्यात् आनयनारोहणादिशिक्षाकर्म कुर्यात्। शक्रे ज्येष्ठायां अर्के हस्ते वसुभद्वये धनिष्ठाशतभिषक्अदि-तियुगे पुनर्वसुपुष्ये द्वीशे विशाखायां अश्विन्यां पौष्णे रेवत्यां गवां गोवृषाणां आनयनादिक्रयविक्रयेज्यादिमोदमनादिकर्म कुर्यात् । कर्णे श्रवणे ध्रुवेषु रोहिण्युत्तरासु पर्वणोः दर्शपौर्णमास्योः पक्षकदले अष्टम्यां त्वाष्ट्रे चित्रायां रिक्तातिथौ अर्कवारे पशूनां पूर्वोक्तकरितु-रंगगवां किमपि कार्यं न कार्यम्। तथाचोक्तम्। 'चित्रोत्तरावैष्णवरो-हिणीषु चतुर्दशीदर्शदिनाष्टमीषु । स्थानप्रवेशं गमनं विदध्याद्धीमा-न्पशूनां न कदाचिदेव ॥ ४४ ॥

चक्रेऽश्वे शिरसि त्रयं सुखकरं वक्त्रे त्रये मानदं
वृद्ध्यै पंच हृदिस्थभानि चरणेष्वष्टे तु दुष्टानि च ॥
पुच्छे स्वक्षयकृच्चतुष्टयमथो पृष्ठे चतुष्कं मृतौ
सूर्यर्क्षादिनभावधेः फलमिदं वाहर्क्षतः केचन ॥४५॥

चक्रे इति । अश्वे चक्रे अश्वाकारचक्रे सूर्यर्क्षाद्त्रयं शिरसि देयं अत्र मुहूर्ते सुखकरं ततस्त्रयं वक्त्रे मुखे मानदं भवति ततः हृदि पंच भानि वृद्ध्यै वाहनवृद्ध्यै भवंति चतुश्चरणेषु ततोऽष्टभानि दुष्टानि भवंति पुच्छे चतुष्टयं स्वक्षयकृद्धनना।शाद्भवति पृष्ठे चतुष्कं मृतिनि-मित्तं भवति इति सूर्यभादिनभावधेः फलं केचन वदंति केचन वाहर्क्षतः अश्वस्य नामनक्षत्रादिनभावधेः फलं वदंति तत्तु नरपतिज-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चर्चायां युद्धसमये शनिस्थितिविलोकनार्थे तुरंगभालिखंति अत्र तु सूर्यभादेव गणना कार्या ॥ इति करिवाजिगोकर्म ॥ ४५ ॥

सौम्ये पौष्णयुगे करेऽदितियुगे द्वीशे धनिष्ठाद्वये
पूर्वास्विंद्रयुगे सदुष्ट्रमहिषीकर्माथ मंथानकम् ॥
मूले पौष्णकरत्रये ध्रुवमृगे मैत्रेऽश्विभे वासवे
तोयार्चा शशिजीवभार्गवदिने मूले करे वैष्णवे ॥४६॥

सौम्ये इति । एषु योगेषु उष्ट्रकर्म सत् एषु केषु सौम्ये मृगे पौष्णयुगे रेवत्यश्विन्योः करे हस्ते अदितियुगे पुनर्वसुद्वये द्वीशे विशाखायां धनिष्ठाद्वये शतभिषक् पुनर्वसुतिसृषु इंद्रयुगे ज्येष्ठामूलयोः उष्ट्रस्य दातिबंधनक्रयविक्रयादि कार्यं महिषी आनेया दोह्या । अथ मंथानकं दधिमंथनमुहूर्तः । मूले पौष्णे रेवत्यां करत्रये हस्तचित्रास्वातौ ध्रुवाणि रोहिण्युत्तराणि मृगे मैत्रे अनुराधायां अश्विभे वासवे धनिष्ठायां दधिमंथनस्य नवीनारंभः कार्यः । अथ तोयार्चा प्रसूताभिः स्त्रीभिः जलमातॄणां पूजा कार्या सा तोयार्चा चंद्रगुरुभार्गववारेषु मूलभे हस्ते वैष्णवे श्रवणे अन्यत्र कुलाचारादपि पूजा ॥ इत्युष्ट्रमहिषीमंथानतोयार्चाः ॥ ४६ ॥

मासे फाल्गुनपौषमाधवनभोमार्गेऽष्टमीं द्वादशीं
रिक्तां प्रोज्झ्य शशिज्ञजीवदिवसे हस्तेऽथ मैत्रे ध्रुवे ॥
पुष्ये मैत्रवसुद्वये शनिबुधेज्यर्क्षे तनौ कर्किणि
श्रेष्ठः कूपविधिश्च सौम्यखचरैः केंद्रत्रिकोणस्थितैः ४७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मासे इति । एषु योगेषु कूपविधिः श्रेष्ठः एषु केषु फाल्गुन-पौषमाधवनभोमार्गे मासे माधवो वैशाखः नभः श्रावणः मार्गः मार्गशीर्षः तत्र अष्टमीं द्वादशीं रिक्तां प्रोज्झ्य त्यक्त्वा शशी चंद्रः ज्ञो बुधः जीवो गुरुः एषां दिवसे वारे हस्तभे पैत्र्ये मघायां ध्रुवे रोहिण्युत्तरात्रयेषु पुष्ये मैत्रे अनुराधायां वसुद्वये धनिष्ठाशतभिषक्-द्वये शनिबुधेज्यर्क्षे शनिबुधगुरूणां ऋक्षे राशौ तनौ लग्ने कर्किणि लग्ने सौम्यखचरैः सौम्यग्रहैः केंद्र १ । ४ । ७ । १० त्रिकोणे ५ । ९ स्थितैः कूपखननारंभः कार्यः ॥ ४७ ॥

ग्रामाद्वायुहुताशराक्षसदिशं त्यक्त्वांबुकूपं खने-
त्तच्चक्रेऽर्कभतस्त्रिकं क्रमगतं मध्येंद्रदिक्तो लिखेत् ॥
चंद्रर्क्षावधि मध्यसौम्यवरुणाग्नेयाः शुभाः पादपा-
रोपे पुष्यमृदुध्रुवाश्विशतभं द्रीशं समूलं करः ॥४८॥

ग्रामादिति । ग्रामात् वायुकोणाग्निकोणराक्षसकोणान्त्यक्त्वा राक्षसं नैर्ऋतिकोणं अंबुकूपं जलभरणार्थं कूपं खनेत् । तच्चक्रे कूपचक्रे अर्कभतः सूर्यभात् त्रिकं त्रिकं मध्येंद्रदिक्तोऽपि क्रमगतं लिखेत् । तत्र मुहूर्तनक्षत्रावधि गणना कार्या मध्यसौम्यवारुणाः ज्ञेयाः शुभाः मुहूर्तनक्षत्रं मध्ये आयाति तच्छुभं वा सौम्यदिशि उदक् श्रेष्ठं वरुणा दिक् पश्चिमायां श्रेष्ठं आग्नेयकोणेऽपि श्रेष्ठम् । अथ पादपारोपे वृक्षारोपणे पुष्यः श्रेष्ठः मृदूनि चित्रा रेवती अनुराधा मृगः श्रेष्ठानि ध्रुवभानि रोहिण्युत्तराणि अश्विनी शतभं शततारा:

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वीशं विशाखा मूलेन सह करः हस्तः एषु वृक्षाः रोपणीयाः बीजवापो वृक्षस्य कार्यः ॥ इति कूपद्रुमाः ॥ ४८ ॥

मैत्रे पौष्णलघुध्रुवादितिमृगे कर्णद्वये स्याद्धरे-
र्वाग्देव्या गणनायकस्य फणिनां कर्णद्वये पुष्यभे ॥
रिक्ताविष्टिकुजान् विहाय नवधीकेंद्रायसंस्थैः शुभैः
पापैः षट्त्रिभवस्थितैर्ग्रहगणस्येज्ये ध्रुवे स्थापनम् ॥

मैत्र इति । एषु योगेषु च हरेः स्थापनं स्यात् क्व मैत्रेऽनुराधायां पौष्णे रेवत्यां लघुषु भेषु हस्त ईज्यः पुष्यः अश्विनी अभिजित्सु ध्रुवेषु रोहिण्युत्तरासु अदितिभे पुनर्वसौ मृगे मृगशीर्षे कर्णद्वये श्रवणधनिष्ठयोः एषु हरेः प्रतिष्ठा वाग्देव्याः सरस्वत्याः वाग्देव्या भगवत्याः गणनायकस्य गणेशस्य फणिनां क्षेत्रपालादीनां कर्णद्वये श्रवणधनिष्ठायां पूषभे रेवत्यां ग्रहणस्य रव्यादीनां शनिपर्यंतानां प्रतिमादिस्थापनं ईज्ये पुष्ये ध्रुवे रोहिण्युत्तरात्रये चतुर्षु ध्रुवभेषु । तत्र प्रतिष्ठायां ग्रहयोगानाह । नव ९ धी ५ केंद्र १ । ४ । ७ । १० आय ११ संस्थैः शुभैः पापैः षट्त्रिः ६ । ३ । भव ११ स्थितैः किं कृत्वा प्रतिष्ठापनं कुर्यात् रिक्ताविष्टिकुजान्विहाय रिक्ता ४ । ९ । १४ विष्टिर्भद्रा कुजं मंगलवारं विहाय प्रतिमानां प्रतिष्ठापनं कार्यम् ॥ इति देवप्रतिष्ठा ॥ ४९ ॥

पौष्णे पुष्यवसुद्वये च रविभे मैत्रोत्तरास्विंद्रभे
सन्नृत्यं नृपतीक्षणं लघुमृदुश्रीशद्वये सद्ध्रुवे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शस्तं सेवकरक्षणं स्थिरतनौ वारे शनेर्भे ध्रुवे
पूर्वार्द्राहिमघेंद्रमूलशतभे याम्ये शुभश्चासवः ॥५०॥

पौष्णे इति । एषु भेषु नृत्यारंभणं सत् क्व पौष्णे रेवत्यां पुष्ये वसुद्वये धनिष्ठा शतभिषक् रविभे हस्तभे मैत्रेऽनुराधायां उत्तरासु तिसृष्वपि इंद्रभे ज्येष्ठायां नृत्यं नृत्यारंभः सत् । नटीनां वा नटानां नृत्यशालायां नृत्यारंभणे मुहूर्त्तावलोकनम् । लघुभेषु हस्तपुष्याश्विन्याभिजित् मृदूनि मृगशीर्षचित्रारेवत्यनुराधाः श्रीशद्वये श्रवणधनिष्ठायां सध्रुवे रोहिण्युत्तरात्रयं ध्रुवभसहिते नृपतीक्षणं नृपावलोकनं सत् । स्थिरतनौ शनेर्वारे ध्रुवभेषु सेवकरक्षणं शस्तं पूर्वासु तिसृषु आर्द्रायां अहिः सर्पः मघायां इंद्रे ज्येष्ठायां मूले शतर्क्षे शततारकायां याम्ये भरण्यां आसवः शुभः । आसवशब्देन द्राक्षासवो लवंगासवो मधुकासवोऽपि ग्राह्यः राज्ञामुपयोगित्वात् तत्संधाने मुहूर्त्तावलोकनम् । रत्नमालायामपि मद्यारंभधिष्ण्यान्यादावुक्तानि । तथाच 'रौद्रे पित्र्ये वारुणे पौरुहूते याम्ये सार्पे नैर्ऋते चैव धिष्ण्ये । पूर्वाख्यासु त्रिष्वपि श्रेष्ठ उक्तो मद्यारंभः कालविद्भिः पुराणैः ॥ ' इति नृत्यनृपेक्षासेवामद्यारंभः ॥ ५० ॥

पौष्णाश्वानिलहस्तमैत्रवसुभेष्वारार्किजीवेभृगौ
पुंश्चल्याः पुनरुद्वहो विधुबले रिक्ताकुयोगोज्झिते ॥
तच्चक्रे रविभात्रिकं क्रमगते मध्येंद्रदिक्तो लिखे-
दाग्नेयी न शुभानिला च विषयं ज्ञात्युक्तधर्मं श्रयेत्५१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पौष्णाश्चेति । एषु योगेषु पुंश्चल्याः पुरुषांतरवांछिन्याः पुनरुद्वहो विधवायाः परनरेण संबंधोऽयं एषु केषु पौष्णे रेवत्यां अश्विन्यां अनिले स्वातौ हस्ते मैत्रेऽनुराधायां वसुभे धनिष्ठायां आरे भौमवारे अर्के रविवारे जीवे गुरुवारे भृगौ शुक्रवारे तत्र विधुवले द्वयोश्चंद्रे शुभे सति रिक्ता कुयोगा व्यतीपातवैधृतिमृत्युकाणयमघंटाद्यैः उज्झिते रहिते । तच्चक्रे पट्टचक्रे अर्कभात् त्रिकं त्रिकं मध्येद्रदिक्तः क्रमेण लिखेत् तत्र मुहूर्तनक्षत्रं आग्नेय्यां शुभं न अनिले वायुकोणेऽपि शुभं न अन्येषु दिग्विभागेषु मुहूर्तभं श्रेष्ठं ज्ञेयम् । विषयो देशः ज्ञातिः स्वकीयो वर्णः क्रमेण ज्ञातिस्तयोक्तो धर्मः तं श्रयेत् । तथा चोक्तम् । 'न शास्त्रदृष्ट्या विदुषा कदाचिन्नो लंघनीयाः कुलदेशधर्माः । मूलं हि तेषां च्युतवेदशाखा महानधर्मः स्थितिभंगदोषात् ॥' इति यत्कुले विधवायाः पुनरुद्वह उचितस्तत्रैव देशे धर्मे तैरेव पूर्वोक्तयोगैः कार्यः ॥ इति वृषलीमुहूर्तः ॥ ५१ ॥

लाभे लाभकृतोऽखिलाः षडनुजे पंगुः कुजोऽर्कः सखे त्र्याद्यास्तारिखगः शशी व्ययगृहं त्यक्त्वा समे विष्टगुः ॥ षट्खास्तान्यमथास्तधर्मधनधीष्वीज्यः शुभो जन्मभादुद्वाहे कुरसत्रिदिक्षु महितश्चेन्नो परैर्वेधितः ॥ ५२ ॥

लाभे इति । अखिला ग्रहाः नवापि ग्रहाः लाभे एकादशस्थाने लाभकृतो भवंति पंगुः शनिः कुजः भौमः षडनुजे षष्ठे तृतीये शुभः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्कः सूर्यः सखे षडनुजे दशमसहिते षडनुजे सूर्यः ३।६।१० श्रेष्ठः शशी त्र्याद्यास्तारिखगः चंद्रः तृतीयः आद्यः प्रथमः अस्तः सप्तमः अरिः षष्ठः खगः दशमः श्रेष्ठः ३ । १ । ७ । ६ । १० विद् बुधः व्ययाख्यं द्वादशगेहं त्यक्त्वा समे २ । ४ । ६ । ८ । १० भृगुः षट्खास्तान्यं यथा तथा षष्ठदशमसप्तमगः शुक्रो नेष्टः अन्येषु सर्वभावेषु श्रेष्ठः १ । २ । ३ । ४ । ५ । ८ । ९ । ११ । १२ ईज्यः गुरुः अस्तधर्मधनधीषु ७ । ९ । २ । ५ । ११ श्रेष्ठः जन्मभात् इदं गोचरफलं जन्मराशेर्गणयित्वा ज्ञेयम् । उद्वाहे विवाहे ईज्यः गुरुः कुरसत्रिदिक्षु १ । ६ । ३ । १० महितः पूजितः सन् शुभो भवति पूजां कृत्वा लग्नं कार्यं तदुक्तम् । 'षष्ठे जन्मनि देवेज्ये तृतीये दशमेऽपि वा । भूरिपूजा प्रकर्तव्या कन्यायाः कथितं शुभम् ॥ ' अयं गोचरग्रहस्तत्फलं यत्कथितं शुभं स तदा फलं ददाति यदा परैर्नो वेधितः अत्र गोचरे ग्रहवेधोप्युक्तोऽस्ति तथा च रत्नमालायामुक्तम् 'लाभ ११ विक्रम ३ ख १० शत्रुषु ६ स्थितः शोभनो निगदितो दिवाकरः । खेचरे सुत ५ तपो ९ जलां ४ त्य १२ गैर्व्यार्किभिर्यदि न विद्ध्यते तदा ॥ ' अत्र शनिर्न विद्ध्यति 'द्यून ७ जन्म १ रिपु ६ लाभ ११ ख १० त्रिग ३ श्चंद्रमाः शुभफलप्रदस्तदा । स्वा २ त्मजां ५ त्य १२ मृति ८ बंधु ४ धर्म ९ गैर्विद्ध्यते न विबुधैर्यदि ग्रहैः ॥ २ ॥' अत्र चंद्रस्य बुधवेधो नास्ति । विक्रमा ३ य ११ रिपुगः ६ शुभः कुजः स्यात्तदांत्य १२ सुत ५ धर्मगैः ९ खगैः । चेन्न विद्ध इनसूनुरप्यसौ किंतु धर्मधृणिना न विद्ध्यते ॥ ३ ॥' शनिस्तु सूर्येण न विद्ध्यते । 'स्वां २ बु ४ शत्रु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६ मृति ८ खा १० यगः ११ शुभो ज्ञस्तदा न खलु विद्ध्यते यदा । आत्मज ५ त्रि ३ तप ९ आद्य १ नैधन ८ प्रांत्य १२ गैर्विविधुभिर्नभश्चरैः ॥ ४ ॥ ' बुधस्य चंद्रवेधो न । ' स्वा २ य ११ धर्म ९ तनयां ५ गना ७ स्थितो नाकनायकपुरोहितः शुभः । रिष्फ १२ रंध्र ८ ख १० जल ४ त्रि ३ गैर्यदा विद्ध्यते गगनगामिभिर्न हि ॥ ५ ॥ आसुताष्टम ८ तपो ९ व्यया १२ य ११ गो विद्ध आस्फुजिदशोभनः स्मृतः । नैधना ८ स्त ७ तनु १ कर्म १० धर्म ९ धी ५ लाभ ११ वैरि ६ सहज ३ स्थखेचरैः ॥६॥' शुक्र एवंविधो विचार्यः यदा वेधकस्थाने ग्रहो भवति ग्रहस्थाने वेधको भवति तदा वामवेधो भवति तदा शुभफलं ग्रहाः प्रयच्छंति । तथा चोक्तम् । ' एवमत्र खचरा व्यधान्विताः सत्फलं नहि दिशंति गोचरे । वामवेधाविधिना त्वशोभना अप्यमी शुभफलं दिशंत्यलम् ॥१॥ ' अत्र प्रायः सन्मुखो वेधो भवतीति प्रायेण सर्वत्रेति । उक्तं च । ' स्वराशेर्यत्र खेटः स्यात्खेटाद्यत्र ग्रहो भवेत् । तत्र वेधो क्षमो ज्ञेयो यथोक्तफलदो ध्रुवम् ॥ ' इति गोचरफम् ॥ ५२ ॥

पूर्वासु श्रवणद्वये मृदुलघुष्वादित्य इष्टे तिथौ
शुक्रार्कैज्यदिने खलैरुपचयेष्विष्टैरषष्ठाष्टगैः ॥
नौयानं सदथोत्तरायमघार्कैज्यश्रुतौ तद्भृति-
र्व्यापारो मृदुभे चरर्क्षलघुभेऽर्कारार्किरिक्तोज्झिते ५३

पूर्वास्विति । एषु योगेषु नौयानं नौकाप्रयाणं श्रेष्ठम् । क्व पूर्वासु तिसृषु श्रवणाद्वये मृदुषु लघुषु आदितिः पुनर्वसुः इष्टतिथौ रिक्ता-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तिथिरहिततिथौ शुक्रार्केज्यदिने शुक्रविगुरुदिनेषु तत्र लग्ने उपचयेषु त्र्यारिखायेषु खलैरशुभग्रहैः इष्टैः शुभग्रहैः अषष्ठाष्टगैः षष्ठाष्टमरहितैः सद्ग्रहैः सद्भिः नौका चालनीया । अथेत्यनंतरं उत्तरायणमर्कार्केज्यश्रुतौ तस्याः भृतिः नौकामध्ये वसुप्रक्षेपः कार्यः तत्तटे गत्वा अर्कारार्किरिक्तोज्झिते समये रविभौमशनिवाररिक्तातिथिरहिते समये मृदुभे चरर्क्षे लघुभे व्यापारः कार्यः साधारणोग्रध्रुवदारुणाख्ये धिष्ण्ये यदत्र द्रविणं प्रयुक्तं न लभ्यते तन्नियतं कदाचिदिति वचनात् मिश्रक्रूरस्थिरतीक्ष्णेषु व्यवहारो निषिद्धः ॥ इति नौकायानम् ॥ ५३ ॥

एकैकं कूपवस्त्रे तरुतलत उदक् षट् भानि दद्यात्पठाणेऽप्येकैकं पृष्ठपार्श्वे नव कुमुडुमुखे मध्य एकं भृतौ षट् ॥ भास्वद्धिष्ण्यात्पठाणाननशिखरतले नो सदिष्टं सुकाणे मध्ये सिद्धिः पठाणे भयमिह गदितं पोतचक्रे फलज्ञैः ॥ ५४ ॥

एकैकमिति । भास्वद्धिष्ण्यात् सूर्यभात् एकं एकं कूपवस्त्रे कूपशब्देन नौकामध्यकाष्ठं वस्त्रं शटिः तत्र एकं एकं धिष्ण्यं लिखेत् तरुतलतः कूपतलतः उदक् षट् षड् भानि दद्यात् पठाणे एकैकं पठाणं नौकामंडनकाष्ठं तत्रैकं सुकाणे कर्णधारणनिवेशस्थानेऽपि एकैकं पृष्ठपार्श्वे नव नवकं पृष्ठं पार्श्वे च पृष्ठपार्श्वम् तस्मिन् द्वयोः पार्श्वयोः त्रीणि त्रीणि पृष्ठे त्रीणि एवं नवकं मुखे उडुनौमुखे कुं एकं भृतौ षट् भृतिस्थाने षट् देयानि । तत्र पठाणाननशिखरतले

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नो सत् पठाणे नो सत् नौमुखे नो सत् शिखरे कूपमस्तके नो सत् तले नव धिष्ण्यानीष्टानि इष्टं सुकाणे मध्ये सिद्धिः मध्ये त्रयोदश भानि सिद्धिदानि शठाख्ये भयं इह पोतचक्रे फलज्ञैः ॥ इति नौकाचक्रम् ॥ ५४ ॥

आग्नेयं न सदंत्यपित्र्ययमभं मिश्रं भगाजांघ्रिभं
वायव्यं मृगदस्रवाय्वदितिभं त्वाष्ट्रार्यमार्कोंडु च ॥
ऐंद्रं मैत्रकमैंद्रमिष्टफलदं वैश्वाच्चतुष्कं तथो-
त्पातं मूलमुपांत्यसर्पवरुणांव्वीशेज्यभं वारुणम् ५५॥

आग्नेयमिति । उत्पाते त्रिविधे दिव्यंतारक्षभौमलक्षणे मंडलद्वयं न सत् । तत्कि अंत्यं रेवती पित्र्यं मघा यमभं भरणी मिश्रं कृत्तिकाविशाखे भगं पूर्वाफाल्गुनी अजांघ्रिभं पूर्वाभाद्रपदा एतदाग्नेयमंडलं अग्निसम्बन्धमण्डले उपसर्गे न सत् । च परं मृगदस्रवायुअदितिभं त्वाष्ट्रार्यमार्कोंडुमृगशीर्षमाश्विनीस्वातीपुनर्वसुचित्रोत्तराफल्गुनीहस्तं इदं वायव्यमंडलं तत्रापि उत्पातो न सत् । मैत्रमनुराधा कं रोहिणी ऐंद्रं ज्येष्ठा वैश्वादुत्तराषाढायाश्चतुष्कं उत्तराषाढाभिजिच्छ्रवणधनिष्ठा एतदैंद्रमंडलं भवेत् तत् इष्टफलदम् । मूलमुपांत्यमुत्तराभाद्रपदा सर्प आश्लेषा वारुणं शततारका अंबु पूर्वाषाढा ईशमार्द्रा ईज्यभं पुष्यः इदं वारुणमंडलं उत्पाते इष्टफलदम् । तथा चोक्तममृतकुंभे । ' अर्यम्णचित्रादितिमैंदवाश्विस्वात्येऽर्कभे चेति गणोऽनिलस्य । याम्याजपादाग्निभगोऽपि पौष्णमघाविशाखाहुतभग्गणोऽयम् ॥ तोयेशाहिर्बुध्न्यरक्षोंबुपूषासर्पेशानं वारुणाग्निश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भानि । मैत्रब्राह्म्यं वैष्णवं वासवेंद्रं वैश्वं चंद्रोऽयं भवर्गोऽभिजिच्च ॥' फलम् । 'वायोर्गणात्कोऽपि यदोपसर्गो भवेत्तदानीं पवनोऽतिचंडः । सिक्ता भवेद्वा रुधिरेण भूमिर्लोके नृपे चापि महानधर्मः ॥१॥ वह्नेर्गणे नेत्ररुजोऽतिसारो पृथ्व्यर्धहानिर्ज्वलनप्रकोपः । गम्रश्चाल्पदुग्धास्तरवोऽफलाः स्युर्गर्भप्रपातश्च नितंबिनीनाम् ॥ २ ॥ गावो बहुक्षीरघृतादियुक्ता वृक्षाः प्रजाः क्षेमसुभिक्षयुक्ताः । मेघाः प्रभूतांबुमुचो भवंति वर्गे जलेशस्य च सोपसर्गे ॥३॥ महेंद्रवर्गे वनितासु सौख्यं प्रजाश्च सर्वा मुदिता भवंति । निकामवर्षी मघवा धरित्री प्रभूतसस्याधिगमश्च विद्यात् ॥ ४ ॥ ' इति चतुर्थमंडलानि ॥ ५५ ॥

नंपूभाभजपूरिनंजरिजपूर्घाता तिथिर्मेषभात्
सूशश्चंबुशशाबृशुःशुंमगुशुर्वारा महोस्वानुमूः ॥
श्रूपूषांत्यभरो शिवाहिभमथो चंद्रेषुनंदद्विषट्-
दिग्रामाद्रियुगाष्टरुद्ररवयो घातं भमिंदुस्तथा ॥५६॥

नमिति । मेषभात् मेषराशेः सकाशादेतास्तिथयो घाताः स्युः । ताः काः नं नंदा पू पूर्णा भा भद्रा भ भद्रा ज जया पू पूर्णा रि रिक्ता नं नंदा ज जया रि रिक्ता ज जया रि रिक्ता पू पूर्णा एताः तिथयः । अथ घातवारः । सू सूर्यः श शनिः चं चंद्रः बु बुधः श शानः शा शानिः बृ बृहस्पतिः शु शुक्रः शु शुक्रः मं मंगलः गु गुरुः शु शुक्रः । इति घातवाराः । अथ घातभं म मघा ह हस्तः स्वा स्वातिः अनु अनुराधा मू मूलं श्रू श्रवणं पू पूर्वाषाढा अंत्यं रेवती भ भरणी रो रोहिणी शिवा आर्द्रा अहिभं आश्लेषा इति घातनक्षत्राणि । अथानंतरं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घातचंद्रः । चंद्रः प्रथमः इषवः पंच नंदा नव द्वि द्वौ षट् षष्ठः दिक् दशमः रामस्तृतीयः अद्रिः सप्तमः युगानि चतुर्थः अष्ट अष्टमः रुद्राः एकादश रवयो द्वादश एते घातचंद्राः कथिताः । इदं यद्यपि घातचतुष्टयं निर्मलं दृश्यते । तथापि रामज्योतिर्विदा मुहूर्तचिंतामणौ लिखितत्वात् । 'भूपंचांकह्यंगदिग्वह्निसप्तवेदाष्टेशार्काश्च घाताख्यचंद्राः । मेषादीनां राजसेवाविवादे यात्रायुद्धोद्वाहकालेषु नूनम् ॥' इति घातातिथिवारनक्षत्रचंद्राः ॥ ५६ ॥

चापेंत्ये दिनकृत्यपायनगते जीवे च सिंहस्थिते
बालेऽस्तेऽप्यतिचारगे स्थविरतां प्राप्ते तथा भार्गवे॥
सीमंतान्नभुजिस्तथोपकरणं दंताब्जकौसुंभकं
धार्यं स्त्रीभिरिदं सदापि च परं कार्यं न कार्यं कदा ५७

चापेंत्य इति । दिनकृति सूर्ये चापे धनुषि स्थिते अंत्ये मीनगतेऽर्के वा अपायनगते दक्षिणायनगते जीवे गुरौ सिंहस्थिते वा जीवे बालेऽस्ते वातिचारगे वा स्थविरतां प्राप्ते सति सीमंतकर्म अन्नभुजिः अन्नप्राशनं तथा स्त्रीभिरुपकरणं भूषणं दंतशब्देन करभूषा अब्जं मौक्तिकं कौसुंभकं वस्त्रादि इदं सदा स्त्रीभिर्धार्यं कदापि न कार्यं अत्र परिशेषविधानात् सर्वं निषिद्धमुक्तम् । तथा चोक्तं ज्योतिर्निबंधे । 'नीचस्थे वक्रिते वाप्यतिचरणगते बालवृद्धास्तमे वा संन्यासो यज्ञयात्राव्रतनियमविधिः कर्णवेधोऽपि दीक्षा । मौंजिबंधोऽगनानां परिणयनविधिर्वास्तुदेवप्रतिष्ठास्त्याज्याः सद्भिः प्रय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्नात्रिदशपतिगुरुर्लोपसंस्थे हरिस्थे ॥ १ ॥' तत्र शुक्रास्ते प्रतिप्रसवमाह । 'नृत्ये याने गृहे जीर्णे प्राशनांतेषु सप्तसु । वधूप्रवेशमांगल्यं न मौढ्यं गुरुशुक्रयोः ॥ २ ॥' वधूप्रवेश इत्युद्वाहिताया एव गृहप्रवेशः । निर्णयसिद्धांतेऽपि । 'प्रागस्तादुदयात्परं सुरगुरुः पक्षेऽथ वा वार्धके बालेऽस्ते स्थविरे सिते सुरगुरौ कार्यं न कुर्यादिदम् । चौलादुद्वहनांतमालसुरथानव्यो न वध्वागमोद्योपाकर्ममहार्पणं व्रतनवोत्सर्गा हरेज्याध्वराः ॥ १ ॥' अन्यच्च । 'अस्तंगते गुरौ शुक्रे बाले वृद्धे मलिम्लुचे । व्रतारंभोत्सर्जनं च न कुर्यान्मौंजिबन्धनम् । वापीकूपतडागादिप्रतिष्ठा यज्ञकर्म च । गृहप्रवेशं गोदानं स्थानोत्सवमहोत्सवान् । न कुर्यान्मलमासेषु गुरुशुक्रे तथास्तगे ॥' तत्रापि सिंहस्थे गुरौ भूपालवल्लभे विशेषः कथितोऽस्ति । 'अष्टाविंशति वासरान्सुरगुरोर्वक्रातिचारे त्यजेत्सिंहे पंचनवांशका मृगगते पंचैव नीचांशकान् । गोदाभ्यंतरवासिनां व्रतविवाहक्षौरकार्यादिकं कार्यं तत्र सदात्र नापरतरं तीर्थं हि गोदाजलात् ॥ १ ॥ गर्भाधानादिकाः सर्वाः प्राशनांताः क्रियाश्च ताः । कर्तव्याः सर्वदेशेषु सिंहस्थे च बृहस्पतौ ॥ २ ॥ गोदावर्युत्तरे तीरे भागीरथ्याश्च दक्षिणे । विवाहादि न कर्तव्यं सिंहस्थे च बृहस्पतौ ॥ ३ ॥ वरलाभातिकालाभ्यां दुर्भिक्षाद्देशविप्लवात् । गौतम्या दक्षिणे तीरे सिंहस्थेऽप्युद्वहः शुभः ॥ ४ ॥ सिंहस्थेऽपि मघासंस्थं गुरुं यत्नेन वर्जयेत् । अन्यत्र सिंहभागेषु विवाहादि विधीयते ॥ ५ ॥ षष्टिभिर्दिवसैर्मासैः कथितो बादरायणैः । उत्तरे देवकार्याणि पितृकार्याणि चोभयोः ॥ ६ ॥' एवं गुरोरतिचाराल्लुप्ताब्द आयाति । तथा चोक्तं मुहूर्तचिंतामणौ । 'गोजांत्यकुंभेतर-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मेऽतिचारगो नो पूर्वराशिं गुरुरेति वक्रितः। तदा विलुप्ताब्द इहाति-र्निदितः शुभेषु रेवासुरनिम्नगांतरे ॥ ' इत्याद्यखिलमूह्यम् ॥ ५७ ॥

आद्यानामनवद्यपद्यरचना नाना विचिंत्यात्मना
लोकानां व्यवहारदर्शनविधौ सप्तेषुवृत्तैः स्फुटम् ॥
श्रीमद्रैवतराजपूजितपदः श्रीकान्हजिद्वाडवः
सूनुस्तस्य मुहूर्तदीपमकरोदेनं महादेववित् ॥ ५८ ॥

आद्यानामिति । महादेवः कविः एनं मुहूर्तदीपमकरोत् किंलक्षणः श्रीमद्रैवतराजपूजितपदः श्रीकान्हजिद्वाडवः तस्य सूनुः श्रीमांश्चासौ रैवतश्च रैवताचलस्तस्य राजानः तैः पूजितौ पादौ यस्य एवंविधः कान्हजित्वाडवः तस्य सूनुः अपत्यं किंकृत्वाऽकरोत् आद्यानां वराह-श्रीपतिलल्लत्रिविक्रमाद्याचार्याणां अनवद्या या पद्यरचना ग्रंथान् रत्नमालात्रिविक्रमशतरत्नकोशव्यवहारप्रकाशसज्जनवल्लभवृत्तशतमुहू-र्ततत्वादिनिबंधान् नाना अनेकप्रकारेण आत्मना चित्तेन विचिंत्य विचार्य किंनिमित्तं लोकानां सर्वेषां व्यवहारमुहूर्त्तदर्शनस्य विधि-र्निमित्तम् । वस्तुव्यवहारदर्शनं तु दीपेनैव भवति । तथा सप्त-सप्तेषुवृत्तैः कृत्वा मुहूर्त्तदीपमकरोदिति यथा दीपे वर्तिस्तथाऽत्र सप्तपंचाशद्वृत्तलक्षणा वर्तिस्तया हेतुभूतया ॥ ५८ ॥

शाके रामगजेषुभूपरिमिते १५८३ सौम्यायने भास्करे
चैत्रे मासि सिते दले शिवतिथौ वारे विधौ भास्करे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याघाते युजि वाणिजे च करणे श्रीमद्भुजे पत्तने
लेखित्वाथ मुहूर्तदीपकभवाख्यानं महादेवकः ॥ १ ॥

इति श्रीमहादेवभट्टविरचितो मुहूर्तदीपकः सटीकः
समाप्तः ।

बालावबोधार्थमियं मयात्र व्याख्या कृता विस्तरवर्जिता या ।
तुष्यंतु संतः प्रविचार्य तत्वं यथा तथैवोपहसंत्वसंतः ॥ १ ॥

इति श्रीमन्महादेवकविविरचिता मुहूर्तदीपकटीका समाप्ता ।

११।१।१६.

पुस्तक मिलनेका ठिकाना—
गंगाविष्णु श्रीकृष्णदास,
" लक्ष्मीवेंकटेश्वर " छापाखाना,
कल्याण—मुंबई.

Kirtikant Sharma Collection, Najafgarh